# कोषशास्त्रस्य इतिहासः

**कृत्तिवासमहापात्रः**

'आवृत्तिः सर्व्वशास्त्राणां बोधादपि गरीयसी' इति महतां वचनमनुसृत्य आवृत्तौ समधिको यत्नः पाण्डित्यलाभस्य सहायको भवेत्। विशेषतो व्याकरणेऽभिधाने च य एव यादृशो निष्णातः स तादृशः पण्डित इति विवेचितवान्। अभिधानं कोषशास्त्रमिति प्रथितम्। शब्दस्य अर्थबोधाय कोषशास्त्रं संस्कृतसाहित्ये अमूल्यसम्पद् इति प्रथितम्।

आलङ्कारिकैर्विवेचितम् यत् परस्परं निरपेक्ष सारगर्भ श्लोकः संक्षिप्तोक्तेरेकत्र संकलनमेव कोषकाव्यमिति। किञ्च आधुनिकाभिधानेन सह कोषशास्त्रस्य किञ्चित् पार्थक्यं विद्यते। प्राचीनकोषशास्त्राणां मध्ये अनेकान्येव पद्येन विरचितानि तथा शब्दा अपि एकार्थकाः अनेकार्थकाश्चेति भेदेन द्विधा विभक्ता आसन्। प्राचीनाः शब्दशास्त्रज्ञा **'शब्दकोषः'**, **'कोषकाव्यम्'**, **'शब्दार्थशास्त्रम्'**, **'अर्थशास्त्रम्**, **'शब्दार्थसंग्रहः'**, **'पदार्थसंग्रहः'** प्रभृति कोषग्रन्थाः बहुधा नामकेन इदम् अभिधानशास्त्रम् अभिहितवान्। **'नामानुशासनम्'**, **'नामलिङ्गानुशासनम्'** वा नाम्ना अपि अस्य परिचितिरस्ति। प्रकृतं खलु व्याकरणशास्त्रादेव शब्दसंकलनस्य धारणा समेता। तथा च शब्दसंकलनस्य धारणातः अभिधानस्य कोषग्रन्थग्रन्थनायाः प्रयासो वा। व्याकरणे खलु सर्व्वेषु विषयेषु धातुपाठ, ऊणादिसूत्र, गणपाठ, लिङ्गानुशासनादयश्च (विषयाः) विद्यन्ते। एषु यथाक्रमं धातुशब्दलिङ्गानुसारतः शब्दसमूहस्य क्रमपञ्जी विद्यते। अस्याः पञ्जीप्रक्रियातः तथा शब्दानां वर्गीकरणप्रचेष्टातः एव परवर्त्तिकाले अभिधानस्य कोषकाव्यस्य वा उत्पत्तिर्बभूव। वैदिकशब्दानामर्थज्ञानाय काव्यरचनार्थञ्च कवेः कोषशास्त्रे अभिधाने वा ज्ञानमावश्यकम्। तत आलङ्कारिकेन वामनेन प्रोक्तम्-





**'अभिधानकोषात् पदार्थनिश्चयः'** इति। अस्यैव **'कामधेनु'** नामिकायां टीकायां प्रोक्तम्- **'तस्मादभिधानकोषतः पदस्यार्थं निश्चित्य निर्विचिकित्सकं प्रजुञ्जीतेति।'**

वैदिकाभिधानं कोशशास्त्रस्य प्राचीनग्रन्थः अभलुप्तो बभूव। किञ्च बहुषु स्थानेषु पूर्व्वाचार्य्यानां नामानि श्रूयन्ते। तानि नामानि यथा- शाकपुनिः, कात्यायनः, शाकटायकः, गार्ग्यः, ऊर्णनाभः प्रमुखानि उल्लेखयोग्यानि। सम्प्रति आचार्य्ययास्कमहाभागेन प्रणीतं **'निरुक्तमे'**व केवलम् उपलभ्यमानं वैदिकाभिधानम्।

**निरुक्तम्**

वैदिकमन्त्राणां विभिन्नपदानाम् अर्थज्ञानाय यत् शास्त्रमपरिहार्य्यं तस्य नाम निरुक्तम्। ततो निरुक्तम् एकविधं वैदिकशब्दाभिधानं मन्त्रभाष्यं वा। प्राचीननिरुक्तकाररूपेण शाकपुणि, ऊर्णनाभ प्रमुखाः सर्व्वैर्विज्ञातव्याः। अधुनैव समये आचार्य्य यास्कप्रणीतेन **'निरुक्तम'**व केवलमुपलभ्यमानं वैदिकाभिधानम्। प्राचीननिरुक्तकाररूपेण शाकपुणि, ऊर्णनाभ प्रभृतिनां नामानि प्राप्तानि। तेषां कियन्ति मतानि विभिन्नेषु ग्रन्थेषु उल्लिखितानि बभूवुः। तथापि प्राचीननिरुक्तग्रन्थाः अधुना विलुप्ता दृश्यन्ते। आचार्य्ययास्कप्रणीतं **'निरुक्तमे'**व एतस्मिन् विषये अधुना प्रामाण्य ग्रन्थः। सायनाचार्यस्य ऋग्वेदभाष्योपक्रमणिकायां निरुक्तस्य प्रयोजनस्यापि आलोच्यविषये प्रोक्तमिदं यत्- **'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्'** इति। **'निरुक्तमि'**ति पदस्य व्युत्पत्तिगतोऽर्थोऽयं भवति- पदस्य सकलार्थ एव यत्र पृथक् पृथक् रूपेण निःशेषेण उच्यते तन्नाम निरुक्तमिति। अत्र 'गौः' 'ग्ला' इत्यादि पदात् समारभ्य 'वसवः', 'वाजिनः', 'देवपत्न्यः' इति पदानि यावत् पदसमूहानां समाम्नायः उक्तः बभूव।

यास्कस्य निरुक्तं काण्डत्रयेण द्वादशाध्यायैश्च विभक्तम्। काण्डत्रयस्य नामानि यथा- नैघण्टुककाण्डः, नैगमकाण्डः, दैवतकाण्डश्च। 'गौः' इति शब्दात् 'अपार' इति शब्दपर्यन्तः

नैघण्टुककाण्डः। असौ काण्डः अध्यायत्रयेण विभक्तः। नैगमकाण्डे अस्ति वेदे प्रयुक्त विविधार्थानां उत्पत्तेः अर्थस्य च दृष्टान्तेन सह व्याख्या। जहादितः उल्वमृवीसा पर्यन्तः नैगमकाण्डः। दैवतकाण्डे सन्ति पञ्च अध्यायाः। 'अग्नितः' समारभ्य 'देवपत्नी' पर्यन्तः दैवतकाण्डः।

वैदिकयुगे यास्काचार्य्यः 'निघण्टु' नाम्ना वैदिकशब्दसमूहानां कोषं अभिधानग्रन्थं वा रचितवान्। यास्काचार्य्यः तस्य 'निरुक्तम्' इति नाम्ना व्याख्यामूलकग्रन्थं रचितवान्। स मन्ये ख्रीष्टपूर्व षष्ठशतके आविर्भूतः बभूव। निघण्टुं निरुक्तं च भारतीयकोषं अभिधानशास्त्रस्य प्राचीनतमशास्त्रं रूपं तथा संस्कृतकोषशास्त्रस्य रचनायाः अनुप्रेरणेति प्रथिता।

आचार्य्यः यास्कः प्रथमे 'निघण्टु' इति शब्दस्य व्युत्पत्तिं प्रदर्श्य चतुर्विधानि पदस्य नामानि समुल्लेखितानि यथा- **'नामाख्यातोपसर्गनिपाताः'** इति। स क्रियापदस्य षट् संख्यकान् विकारान् स्वीकृतवान्। ते विकाराः यथा- **'जायतेऽस्ति विपरिणमते बर्धतेऽपक्षीयते विनश्यतीति।'** अर्थं यथार्थ्यं संरक्ष्य प्रतिशब्दस्यैव निर्वचनं करणीयम्- अयमेव निरुक्तकारस्य अभिप्रायः। कस्यापि दुरूहशब्दस्य व्युत्पत्तिगतोऽर्थः यदि न निरूपितो भवेत् तर्हि वर्णागमं वर्णलोपं विभक्तिर्विपरिणामादिकं समाश्रित्य अर्थनिर्धारणं करणीयम्। यतः मन्त्रे व्यवहृतदुरूहशब्दस्य अर्थनिर्धारणमेव निरुक्तशास्त्रस्य मूलीभूतमुद्देश्यम्। ततो निरुक्तकारः ग्रन्थमिमं विद्यास्थानं व्याकरणस्य सम्पूर्णत्वसाधकरूपेण स्वार्थसाधकरूपेण च समुल्लेखितवान्। तद् यता **'तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च।'** वेदमन्त्रार्थज्ञानाय पदपाठाय समासादिरूपपदविभाजनाय च, ततः किं नामपदं कस्मात् आख्यातभागात् निष्पन्नं तद् ज्ञानाय, को देवः केन मन्त्रेण स्तुत्यः तद् निर्धारणाय च निरुक्तशास्त्रम् अपरिहार्य्यं भवेत्।

संस्कृताभिधानेषु पञ्चविधाः शब्दाः निर्णीताः। ते यथा- कृदान्ताः, तद्धितान्ताः, समासान्ताः, ऊणाद्यन्ताः शब्दानुकरणजाताश्च।





संस्कृतकोषग्रन्थाः श्लोकैर्विरचिताः। तत्र ते द्विधाविभक्ताः। १) **एकार्थकशब्दसंकलनम् (Symonymical) पर्य्याय-समार्थक-शब्द-समूहसंकलनम् वा। २) अनेकार्थकशब्दसमूहसंकलनम् (Homonymical)** । एकार्थक-शब्दान् समार्थकपर्य्यायेन विन्यस्तान् विधाय अभिधानं यत् रचितं तदेकार्थकं पर्य्यायकं शब्द-कोषः अभिधानं वा भवेत्। ततो नानार्थकशब्दान् एकत्रे संगृह्य यदभिधानं रचितं स नानार्थकशब्दकोषः अभिधानं वा नाम्ना परिचितं जातम्।

इतः परं कोषग्रन्थरूपेण आयाति-

**अमरकोषः नामलिङ्गानुशासनम् वा :** संस्कृताभिधानस्य कोषग्रन्थस्य वा आलोचनाप्रसङ्गे यस्य नाम प्रथमतः स्मरणीयं तदेव भवति अमरसिंहस्य **'अमरकोषः नामलिङ्गानुशासनं'** वा। अमरसिंहस्य नामानुसारेण असौ कोषग्रन्थः 'अमरकोषः' इति नाम्ना परिचितः। ख्रीष्टीयपञ्चमशताब्द्याम् अमरसिंहस्य आविर्भावो बभूव। अमरसिंहो विक्रमादित्यस्य नवरत्नसभागतः अन्यतमो रत्नो बभूव। कालिदासस्य रचनारूपेण प्रचलितस्य **'ज्योतिर्विदाभरणम्'** नामक ग्रन्थस्य एकस्मिन् श्लोके अमरसिंहं नवरत्नसभायाः अन्यतमरत्नरूपेण उल्लेखितवान्-

'धन्वन्तरिक्षपणकामरसिंहशङ्कुर्वेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायाम्; रत्नानि वै वररुचिर्नवविक्रमस्य॥'

अस्मिन् ग्रन्थे 'समाहृत्यान्यतन्त्राणि' पदेनानेनानुमानं भवति यत् तस्य ग्रन्थस्य प्रागपि प्रचलिताः आसन् कोषग्रन्थाः। 'अमरकोष' इति ग्रन्थो भवति एकार्थशब्दसम्भारस्य कोषः। काण्डत्रयेणासौ ग्रन्थो विभक्तः। ततोऽसौ ग्रन्थः 'त्रिकाण्डी' इति नाम्ना परिचितः। तत्काण्डत्रयं यथा स्वर्गकाण्डः, भूमिकाण्डः, सामान्यकाण्डश्च। 'स्वर्गकाण्डे' स्वर्ग-व्योम-दिक्-काल-धी-शब्दादि-नाट्य-पाताल-भोगि-नरक-वारिवर्गाणामपि तदन्तर्गतस्थितानां विभिन्नशब्दानाम् अनेकप्रतिशब्दानामपि लिङ्गनिर्धारणं समुल्लेखितम्। 'भूमिकाण्डे' भूमि-पुर-शैल-वनौषधि-सिंहादि-मनुष्य-ब्राह्मण-ब्रह्म-क्षत्रिय-वैश्य-

सूद्रवर्गाणामन्तर्गतानां विभिन्नशब्दानां समालोचना वर्त्तते। सामान्यकाण्डे विशेष्यनिध्न-संकीर्ण-नानार्थ-अव्यय-लिङ्गादिसंग्रह-स्त्रीलिङ्ग-संग्रह-क्लीवलिङ्ग-पुंलिङ्गसंग्रहप्रतिपाद्यवर्गाणामालोचना वर्तते। ततः समासानुसारेण शब्दानां लिङ्गानि, पुंनपुंसकादि, स्त्रीनपुंसकादि, त्रिलिङ्गसंग्रहादिकं समालोचितमभूत्।

असौ ग्रन्थ आदितः समाप्तिं यावत् अनुष्टुप् छन्दसा रचितः। प्रतिकाण्डं कतिपयवर्गैः विभक्तः। जनप्रियताव्यापारेण ग्रन्थस्य बहवः टीकाः विरचिताः। तासु क्षीरस्वामिनः 'अमरकोष उद्घाटन' टीकैव प्राचीनतमा सर्वश्रेष्ठा। च। तदन्याः प्रसिद्धतमा टीका यथा- सुभूतिचन्द्रस्य 'कामधेनु' नाम्नी टीका, सर्वानन्दस्य 'टीकासर्वस्व' नाम्नी, भानुजिदीक्षितस्य 'व्याख्यासुधा' नामिका, रामनाथस्य 'त्रिकाण्डविवेक' नामिका, रायमुकुटवृहस्पतिकृत 'पदचन्द्रिका' प्रभृतयः विद्यन्ते। ख्रीष्टीय द्वादशशताब्द्यां पुरुषोत्तमदेवः 'त्रिकाण्डशेष' नामकं अमरकोषस्य एकं परिशिष्टभागं रचितवान्।

ख्रीष्टीय द्वादशशताब्द्यां पुरुषोत्तमदेवः चतुरः विख्याताभिधानग्रन्थान् रचितवान्। यथा- क) 'त्रिकाण्डशेषः', ख) 'हारावलिः', ग) 'वर्णदेशाना', घ) 'द्विरूपकोष' च।

क) **त्रिकाण्डशेषः**- असौ अमरकोषस्य अपूर्णांशपूरणाय रचितः। ग्रन्थस्य वर्गक्रमपरिभाषा प्रभृतयः ामरकोषस्य अनुकरणे सन्निविष्टाः बभूवः। ग्रन्थकारः स्वयमेव इदमधर्मणत्वं स्वीकृतवान्। यथा-

'वर्गः क्रमस्तथा नामलिङ्गयोस्तूपदेशना।
परिभाषादिकं सर्व्वमत्राप्यमरकोषवत्॥' इति

अमरकोषवत् त्रिकाण्डशेषोऽपि काण्डत्रयेण विभक्तः। प्रतिकाण्डं कतिपयवर्गैः विभक्तः। प्रथमकाण्डे सन्ति एकादशवर्गाः। द्वितीयकाण्डे सन्ति दशवर्गाः। तृतीयकाण्डे च सन्ति पञ्चवर्गाः। अमरकोषे अनुल्लिखिताः शब्दाः अस्मिन् अभिधाने संकलिताः। यथा अमरकोषग्रन्थे स्वर्गस्य प्रतिशब्दसमूहाः-





'स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।
सुरलोको द्योदिवौ द्वे स्त्रियौ क्लीवे त्रिपिष्टकम्॥' इति।

त्रिकाण्डशेषे एवमुक्तं यत्-

'स्वर्लोको देवलोकः स्यादवरोहः फलोदयः।
मन्दरः सैरिभः शक्रभवनं खं दिवं नभः॥' इति।

ख) **हारावलिः**- हारावल्यां अष्ट सप्तत्यधिक द्विशत श्लोकाः प्रधानतः प्रतिशब्दभाजः समध्वनिविशिष्टा भिन्नार्थशब्दनिचयाः संगृहीताः अत्रैव।

ग) **वर्णदेशनाः**- विभिन्नशब्दविन्यासगतभ्रान्तिराशेः दूरीकरणार्थं गद्ये रचिता इयं वर्णदेशना। ततो गौडीयलिपिरूपाय येषु शब्देषु वर्णविन्यासे विभ्रान्ति-सम्भावना समुदेति तादृशाजस्र शब्दालोचनाद्वारेणासौ ग्रन्थः समृद्धो बभूव।

घ) **द्विरूपकोषः**- असौ पञ्चसप्ततिश्लोकैः रचितः अभिधानग्रन्थः। येषां शब्दानां वर्णविन्यासपद्धतिः द्विविधा, अत्र तादृशाः कियन्तः शब्दाः संगृहीता भवन्ति। यथा-

'पारावतः पारवतः कवाटं च कपाटकम्।
अन्त्यश्चान्तः सुखं सौख्यं नखं च नखरं स्मृतम्॥' इति।

**अधिधानरत्नमाला**- ख्रीष्टीय द्वादशशतके हलायुधेन रचिता 'अभिधानरत्नमाला' या संस्कृतशब्दकोषस्य अपरतमः उल्लेख्यो ग्रन्थः। असौ ग्रन्थः नवशतश्लोकैः रचितः पञ्चभिः काण्डैः विभक्तश्च। ते काण्डा यथा- स्वर्गकाण्डः, वूमिकाण्डः, पातालकाण्डः, सामान्यकाण्डः, अनेकार्थकाण्डश्च। स्वर्गकाण्डे ग्रन्थकारः स्वर्ग, देवता, दैत्य, कन्दर्प, सूर्य्य, चन्द्र, नक्षत्रादि शब्दानां पर्य्यायशब्दान् तथा देवलोके विद्यमान् बहूनां वस्तूनां पर्य्यायशब्दान् च निर्देशितवान्। अपरेषु काण्डेषु अपि काण्डस्य नामकरणेन सह सङ्गतिं विधाय विषयो विन्यस्तो बभूव। अनेकार्थकाण्डनामकः अन्तिमकाण्डे विभिन्नार्थे एकस्यैव शब्दस्य व्यवहारः उल्लिखिते बभूव। यथा-

'एकोऽर्थो बहुभिः शब्दैः कथितः कथ्यतेऽधुना।
एकस्यैव तु शब्दस्य बहुष्वर्थेषु वर्तनम्॥' इति।

मेदिनीकरादिभिः कोषग्रन्थनिर्मातृभिः ग्रन्थे अभिधानरत्नमालातः अनेकाः उद्धृतयो लक्षिताः भवन्ति। भट्टहलायुधः 'कविरहस्य' ग्रन्थस्यापि रचयिता भवति।

**अनेकार्थसंग्रहः अभिधानचिन्तामणिश्च**- सुविख्यातः कोषशास्त्रकारः जैनोहेमचन्द्रः चतुरः कोषग्रन्थान् रचितवान्- १) पर्य्यार्यशब्दान् आदाय 'अभिधानचिन्तामणिम्', २) अनेकार्थशब्दान् आदाय 'अनेकार्थसंग्रहम्', ३) प्राकृतभाषायाः शब्दान् आदाय 'देशिनाममालाम्', ४) 'अभिधानचिन्तामणिः', 'देशिनाममाला' च ग्रन्थद्वयस्य परिशिष्टरूपेण रचितः 'निघण्टुशेषः'। 'अनेकार्थसंग्रह' ग्रन्थोऽपि षड्भिरंशे विभक्तः। एतद् विहायापि ग्रन्थस्य शेषे विद्यते एकः परिशिष्टकाण्डः। विद्यते तत्र यथा- आदौ जैनदेवानां नाम, द्वितीये ब्राह्मण्यदेवानां नाम, तृतीये मनुष्यानां नाम, चतुर्थे प्राणिनां नाम, पञ्चमे पातालवासिनां नाम, षष्ठ्यांशे च गुणवाचक-विशेष्य-विशेषणप्रभृतिशब्दानां कथा। परिशिष्टकाण्डे प्राक् रीतिमनुसृत्य ग्रन्थकारः एकस्वरात् पञ्चस्वरविशिष्टाव्ययसमूहानाम् अनेकार्थनिर्देशं चकार। ततः परिशिष्टकाण्डस्य आदावेव हेमचन्द्रोऽब्रवीत् यत्- 'अथाव्ययानि वक्ष्यन्ते प्राग्वदेव स्वर-क्रमात्।' एकस्वरविशिष्टम् 'अ' इत्यव्ययम् अभावे स्वल्पार्थे च व्यवहृतं भवेत्। विष्णुविषये अयं शब्दः अव्ययं न भवति। ततः परिशिष्टकाण्डे प्रोक्तं- 'अस्यादभावे स्वल्पार्थे विष्णावेषत्वनव्ययम्।' पञ्चाक्षरविशिष्टानेकार्थकाव्ययानां दिङ्मात्रमुदाहरणं यथा- 'अनपयति प्रभाते क्षणं क्षणार्थके'। 'अभिधानसंग्रह' ग्रन्थस्य टीकां रचितवान् ग्रन्थकारः स्वयमेव। टीकाया नाम 'अनेकार्थकैरवाकरकौमुदी' इति। अनेके स्वीकुर्व्वन्ति हेमचन्द्रस्य शिष्यः महेन्द्रसूरिः इमां टीकां रचयित्वा गुरोर्नाम्ना प्रचलितवान्। तत एवं रूपेण एकः श्लोकः प्रचलितो बभूव-





'श्रीहेमसूरिशिष्येण श्रीमन्महेन्द्रसूरिना।
भक्तिनिष्ठेन टीकेयं तन्नाम्नैव प्रतिष्ठिता॥'

'अभिधानचिन्तामणिः' इति हेमचन्द्रेन रचितः अपरः एकः कोषग्रन्थः। हलायुधस्य 'अधिभानरत्नमाला' इति हेमचन्द्रस्य 'अभिधानचिन्तामणिः' इति च ग्रन्थद्वितये अनेकांशे सादृश्यमुभयोः विद्यते। एतद् विहाय ग्रन्थद्वितये बहूनां शब्दानां यल्लिङ्गं निर्दिष्टं तेषां शब्दानां अमरकोषे निर्दिष्टलिङ्गस्य सम्पूर्णरूपेण विपरीतम् दृष्टम्। ततः 'अभिधानरत्नमाला' ग्रन्थस्य भूमिकायां Aufrecht नाम्ना महाभागः स्वमन्तव्यरूपेण कथितवान् यत्- 'Again we find that both atribute to many words the same gender in opposition to the Amarakosa.' 'अभिधानचिन्तामणि' इति ग्रन्थस्य रचनारीतिरपि आङ्गिकगठनं 'अनेकार्थसंग्रह' ग्रन्थस्य कियदनुरूपम्। किञ्च 'अनेकार्थसंग्रह' ग्रन्थे संगृहीताः अनेकार्थकाः शब्दसकलाः। तथा 'अभिधानचिन्तामणि' ग्रन्थे संगृहीताः विविधशब्दानां असंख्य प्रतिशब्दभाजः शब्दाः। अस्मिन् ग्रन्थे हेमचन्द्रस्य विविधेषु शास्त्रेषु पाण्डित्यं प्रकाशितं भवति। प्रगाढ-पाण्डित्यहेतोः हेमचन्द्रः 'कलिकालसर्वज्ञ' इति उपाधिना भूषितवान्। 'अभिधानचिन्तामणि' ग्रन्थे एकत्र येन प्रकारेण शब्दानाम् आधिक्यं दृश्यन्ते, अपरत्र तेन प्रकारेण च अस्य ग्रन्थस्य टीकायां तत्कालीय-प्रचलित-प्राचीन-वाक्यानां प्रामाण्यकोषग्रन्थसमूहानां च अजस्रवाक्यानि समुद्धृतानि।

**वैजयन्ती**- अस्य प्रसिद्धकोषग्रन्थस्य रचयिता यादवप्रकाशो दशमशतकीयमहाभागः प्रख्यातदार्शनिकस्य रामानुजस्य समसामयिकः बभूव। अत्र अक्षराणां संख्यानुसारेण शब्दान् विन्यस्तान् चकार। ततो लिङ्गानुसारेण शब्दसमूहाः सज्जिताः भवन्ति। अत्र एतादृशाः अधिकसंख्यकाः शब्दा विद्यन्ते अन्यस्मिन् अधिभानग्रन्थे तादृशाः न प्राप्यन्ते। अस्मिन् शब्दसंख्या सन्निवेशान् विलोक्य अयं वृहत्तरः अभिधानग्रन्थो बभूव। परवर्त्तिनिकाले केशवस्वामिप्रणीतेन

'नानार्थार्णवसंक्षेपः', मेदिनीकारप्रणीतेन 'नामार्थशब्दकोषः', 'अनेकार्थध्वनिमञ्जरी', 'एकाक्षरकोष'श्च। पद्मनाभदत्तप्रणीतेन 'भूरिप्रयोग' इति अभिधानसाहित्यस्य अपरोऽपि एकः उल्लेखयोग्यो ग्रन्थः विद्यते।

**विश्वप्रकाशः**– अस्य कोषग्रन्थस्य रचयिता महेश्वरकविः ख्रीष्टीयद्वादशशतकीय विद्वान्। तस्य पितुर्नाम श्रीब्रह्मः। पितामहस्य नाम कृष्णः। स ख्रीष्टीय पञ्चदशशतकीय महाभागः। सर्वानन्दः हेमचन्द्रश्च तस्य ग्रन्थात् 'इति विश्वः' एवमाभाष्य उद्धृतिं दत्तवन्तौ।

**नामार्थ शब्दकोषः**– प्राणकरस्य पुत्रः मेदिनीकरः अस्य कोषग्रन्थस्य रचयिता। प्रसिद्धः टीकाकारः सर्व्वानन्दो मल्लिनाथः अस्मात् ग्रन्थात् 'इति मेदिनी' इति कथयित्वा उद्धृतिं दत्तवान्।

**सुभाषितरत्नकोषः**– कोषकाव्येषु प्राचीनतमः संकलनः 'सुभाषितरत्नकोषः' 'कवीन्द्रवचनसमुच्चयो' वा। आनुमानिके एकादशशतके विद्याधरः कोषकाव्यमिमं संकलितवान्। आसीद् विद्याधरो जगद्दल–वौद्धविहारस्य आचार्य्यः। संस्कृतसाहित्यस्य प्रथमः कोषकाव्यः 'सुभाषितरत्नकोषः' सम्भवतः वौद्धधर्मावलम्बिनां पालनृपतीनां उत्साहदानेनैव संकलितो बभूव। प्रथमः सम्पादकः F. W. Thomas महाशयः असम्पूर्ण–पाण्डुलिपेः प्रथमपदानुसारात् ग्रन्थस्य नाम **'कवीन्द्रवचनसमुच्चयः'** इति। अस्मिन् ग्रन्थे अश्वघोष–कालिदास–भवभूति–अमरुवान्–राजशेखरप्रभृतिप्रसिद्धकवीनां रचनां विहाय एतादृशां बहूनां कवीनां कविता लभ्यते, ते बङ्गीयकविकल्पा भवितुमर्हन्ति। यथा गौडाभिनन्दनः, बुद्धाकरगुप्तः, धर्माकरः, कुमुदाकरमतिः, वन्द्यतथागतः, वीर्यमित्रः, शुभङ्करः, वैद्यधन्यः, अपराजितरक्षितः, मधुशीलः, छित्तपः, डिम्बोकः, हिम्बोकः, वैद्दोकः, योगोकः, सिद्धोकः, सोन्नोकः, प्रभृतिनामकाः बङ्गीयकवयः (आसन्)।

**सदुक्तिकर्णामृत**– बङ्गीयसेनवंशीयः राजा लक्ष्मणसेनस्य महामाण्डलिकः श्रीधरदासः 'सदुक्तिकर्णामृत' नामकं कोषकाव्यं





(ख्री. १२०५) संकलितवान्। अनुमानाय सङ्गतं यत् राज्ञः केशवसेनस्य राजत्वकाले संकलनम् समाप्तं जातम्। असौ समग्रो ग्रन्थ एव केवलं पञ्चभिः प्रवाहैः विभक्तः। ते प्रवाहाः यथा– शृङ्गारप्रवाहः, चाटुप्रवाहः, उपदेहप्रवाहः, उच्चावच्चप्रवाहश्च। ते प्रवाहाः वीचिनामकेन तरङ्गनामकेन वा विभक्ताः। प्रतितरङ्गं पञ्चभिः श्लोकैरत्नर्भुक्तम्। सर्व्वसाकल्येन षड् सप्तत्यधिक चतुःशत वीचिषु पञ्चाशीत्याधिक चतुःशत संख्यकानां कवीनां अशीत्यधिक त्रयोविंशति शततमाः श्लोकाः संगृहीताः। 'सुभाषितरत्नकोष' ग्रन्थवत् 'सदुक्तिकर्णामृत' ग्रन्थेऽपि अज्ञातपरिचय–अगणित–गौडबङ्गीयकवीनां कविताः स्थानलाभं चक्रुः। लक्ष्मणसेनस्य सभाकवि गोवर्धनाचार्य्य, उमापतिधर, शरण, हलायुधमिश्र, जयदेव प्रभृतीनां रचिता बहुरसैः मिश्रिता यथा कविता विद्यन्ते तथा भावकदेवी, विद्या, विकटनितम्बा प्रभृतयः नारीकवयः तथा अज्ञातकुलशीलाः लक्ष्मीधर, मनोक, रविगुप्त, प्रद्युम्न, धर्म्मकीर्त्ति, धर्म्मपाल प्रभृति कवीनां रचिता विविधभावरसभविता कविता अपि विद्यन्ते। ऊनविंशशतके बङ्गदेशे संकलितौ द्वौ वृहदाकारौ गुरुत्वपूर्णौ च संस्कृतकोषग्रन्थौ विद्येते। प्रसिद्धसंस्कृतज्ञेन तारानाथवाचस्पतिना प्रणीतं 'वाचस्पत्यम्' यत् साधारणभावेन 'वाचस्पत्याभिधानम्' नाम्ना परिचितम् तेषु प्रथमम्। अत्र शब्दान् वर्णानुक्रमिकभावेन सन्निवेश्य तेषां व्युत्पत्तिं लिङ्गं च निर्दिश्य विविधेषु क्षेत्रेषु तेषां प्रोयोगं दर्शितवान्।

**शब्दकल्पद्रुमः**– राज्ञः राधाकान्तदेवस्य उत्साहे अर्थानुकुल्ये च केषाञ्चित् बङ्गीयपण्डितानां अक्लान्तप्रचेष्टया रचितमभवत् 'शब्दकल्पद्रुमः' नाम्ना विख्यातः शब्दकोषः। सप्तभिः खण्डैः समग्रः ग्रन्थः समाप्तिमगात्। 'अ'वर्णात् 'क्ष'वर्णं पर्य्यन्तं वर्णसमूहानां वर्णानुपूर्विका आलोचनैव केवलं न, तेषां व्युत्पत्ति–प्रतिशब्द–अर्थानामपि विभिन्नेषु शास्त्रेषु अस्मिन् शब्दविधौ यदृशं ज्ञातव्यं विद्यते, तत् सर्व्वमालोचनैव विद्यते। विभिन्नतथ्यसमावेशात् असौ ग्रन्थः यथा पाश्चात्यस्य एनसाइक्लोपिडियाख्यस्य प्रतिरूपत्वेन सञ्जातम्।

उक्तैतान् ग्रन्थान् विहाय कात्यायनरचितेन 'नाममाला' कोषग्रन्थः, वाचस्पतिरचितेन 'शब्दार्णव' कोषग्रन्थः, विक्रमादित्यरचितेन 'संसारावर्त' कोषग्रन्थः, व्याडिरचितेन 'उत्पालिनी' कोषग्रन्थः एतन्नामकाः अपरे कोषग्रन्थाः अपि उल्लेखयोग्या विद्यन्ते। किञ्च ते ग्रन्था मुद्रिताः न जायन्ते।

**उल्लेखयोग्याः कियन्तः सर्व्वाधुनिकाभिधानग्रन्थाः**– काशीनाथतर्कालङ्कारस्य 'शब्दसिन्धुसन्दर्भः', उइलसनमहोदयस्य 'A Dictionary in Sanskrit and English", तारानाथतर्कवाचस्पतेः 'शब्दस्तोमहानिधिः' 'वाचस्पत्य'श्च, शिवराम–आप्तस्य 'The Practical Sanskrit English Dictionary', M Monier Williams महाभागस्य 'Sanskrit English Dictionary (1850)', A M Ghatage महाभागस्य 'An Encyclopaedic Dictionary of Sanskrit on Historical Principles (1976-92)' प्रभृतयः कोषग्रन्थाः उल्लेखयोग्या दृश्यन्ते।

कोषकाव्यस्य प्रथमः उल्लेखनीयः दण्डीमहाभागस्य 'काव्यादर्शः'। परवर्त्तिनिकाले विश्वनाथेन 'साहित्यदर्पणे' आलोच्यकाव्यस्य संज्ञानिर्द्देशो यद्यपि कृतः तथापि अपरेषां बहूविषयाणाम् इव तत्सम्पर्कीयविषये कथमपि न आलोचनाय प्रवृत्तः अभूत्। अतः अलङ्कारशास्त्रे कोषकाव्यस्य साधारणाभिधां विना कथमपि न वैशिष्ट्यं न किमप्युदाहरणं न प्राप्तम्।

**शाश्वतकोषः अनेकार्थसमुच्चयो वा**– आनुमानिक–खीष्टीयषष्ठशतके शाश्वतस्य रचितः 'अनेकार्थसमुच्चयः' अयमेकः उल्लेख्यः कोषग्रन्थः। केवलं सप्ताधिक अष्टशतश्लोकैः निबद्धः अयं ग्रन्थः। तथापि स ग्रन्थः असम्पूर्णः। शाश्वतः सम्भवतः अमरसिंहस्य परवर्त्तिनिकाले बभूव।

**आख्यातचन्द्रिका**– धातुकोषस्य महत्वमुपलभ्य प्राचीनविदुषा भट्टमल्लेन 'आख्यातचन्द्रिका' प्रणीता आसीत्। इयं 'आख्यातचन्द्रिका' तु क्रियाभिधानरूपेण विस्तृता अपि एतस्य अभिधानस्य सम्प्रति प्रचाराभावात् अभिधानमिदं दुर्लभम्। धातुकोषेषु पूर्णाङ्गरूपेण





सारसंग्रहरूपेण च प्राचीनतया चेयम् 'आख्यातचन्द्रिका' स्वीयमपूर्वं महत्वं व्यनक्ति।

**प्रयुक्ताख्यातमञ्जरी**– श्रीमता रूपगोस्वामिना प्रणीता 'प्रयुक्ताख्यातमञ्जरी' तु आख्यातकोषभावेन सारसंग्रहरूपाऽस्ति। षोडशशतके प्रादुर्भूतः अयमालङ्कारिकशिरोमणिः साधनेन, ज्ञानेन भगवत्प्रेम्णा च किमपि विशिष्टमेव स्थानं दधाति। अयं सारल्येन संस्कृतधातूनां तेषामर्थस्य रूपस्य च परिज्ञानाय प्राचीनधातुकोषात् सारं समुद्धृत्य 'प्रयुक्तख्यातमञ्जरी' प्राणयत्। लोकव्यवहारे प्रयुक्तानां तिङन्तपदानाम् अत्र अर्थप्रदर्शनं कृतम्। अस्याः देवनागरीलिप्या संस्करणं नैव दृग्गोचरी भवति। उत्कललिप्या एव एतस्याः प्राचीनं नवीनं च संस्करणम् उपलब्धमस्ति।

——

# अधिकारसूत्रस्वरूपे परिभाषावचनानि

ड. गिरिधारिपण्डाः

पदसाधूत्वसम्पादनार्थं समुद्दिष्टे सूत्रात्मकव्याकरणे परिभाषाशास्त्राणि मूर्धन्यभूतानि भवन्तीति विचार्य शास्त्रविदः अभ्यामनन्ति। वाक्यार्थबोधे पदार्थज्ञानं कारणमिति तद्वचनात् पाणिनीयव्याकरणे परिभाषा-सञ्चरणमेतद्विधौ उपायद्वयेन आश्रयितव्यं विद्यते। सूत्रात्मकविधिना परिभाषासूत्रम्, तत्र पुनः संज्ञा परिभाषा-अधिकारभावेन विमर्शमादाय व्यत्याशवृत्तिकल्पनम्, एवञ्च सर्वस्वीकृतमार्गेण परिभाषासूत्रकल्पनम्। परिशीलनेन परिगणनेन च पञ्चाशत् संख्यकानि परिभाषासूत्राणि अष्टाध्ययीग्रन्थविमण्डितानि भवन्ति। एवञ्च ५५० संख्यकानि परिभाषावचनानि व्याडित आरभ्य शेषाद्रिसुधि इति यावत् प्रतिनिबद्धानि वर्त्तन्ते। तेषां सर्वेषां सूत्राणां वचनानाञ्च समूहितेन मार्गेण व्याकरणजगति सूत्रात्मकस्वरूपस्य सूत्रततथ्यस्य च परिष्कारात्मकं परिशीलनं पर्य्यालोचनञ्चावधानत्वं जायते। संज्ञा-परिभाषा-विधिर्नियम्...इति षड्विधेषु सूत्रप्रकारकोटिषु परिभाषासूत्राणि, सूत्राणां तात्पर्यप्रतिपत्तये समुद्दिष्टानि परिभाषावचनानि च पाणिनीयव्याकरणे अनियमस्थले नियममुपपाद्य सूत्रोपातापदानां गोपायितं रहस्यमुद्घाटयन्ति, शास्त्रीयप्रक्रियानिर्वाहञ्च साधयन्ति। परिशीलनेन परिगणनेन च ज्ञायते यत् पञ्चाशत् संख्यकानि परिभाषासूत्राणि अष्टाध्यायीग्रन्थविमण्डितानि भवन्ति। एवञ्च ५५० संख्यकानि परिभाषावचनानि व्याडित आरभ्य शेषाद्रिसुधि इति यावत् प्रतिनिबद्धानि वर्त्तन्ते। तेषां सर्वेषां सूत्राणां वचनानाञ्च समूहितेन मार्गेण व्याकरणजगति सूत्रात्मकस्वरूपस्य सूत्रततथ्यस्य च परिष्कारात्मकं परिशीलनं पर्य्यालोचनञ्चावधातव्यं जायते। अनेकानि परिभाषावचनानि विद्यन्ते यानि अल्पाक्षरैः संयुक्तानि विद्यन्ते। लघूनि सूचितार्थानि वेति तल्लक्षणात् सूत्रसंघटनं सर्वथा





अल्पाक्षरेण भवितव्यम्। सूत्रसंघटनोपाये पाणिनिना यत् कौशलमवलम्बितं तदपि अत्राश्रितं दृश्यते। एवं प्रकारेण षड्विधप्रकारभेदमाश्रित्य सूत्रवत् परिभाषावचनानि शब्दशास्त्रे शास्त्रान्तरेषु वा स्वकीयां तनुं वितनुते, येन शब्दानां साधुत्वप्रकारव्यवस्था अक्षुण्णा साधनीया च जायते। पुनश्च तत्र अधिकारस्य यत् सूत्रस्वरूपं कार्यविधानम् उद्देश्यं तत्सर्वमाकल्य परिभाषावचनान्यपि प्रथितानि जायन्ते। अनुबन्धविषये-आदेशविषये-अनुवृत्तिविषये-सवर्णग्राहकताविषये-तदन्तविधिविषये-अतिदेशविषये-बलवत्त्वप्रतिपादनविषये-नित्यानित्यप्रतिपादनविषये बहूनि परिभाषावचनानि ग्रथितानि विद्यन्ते, येषामुद्देश्यम् अधिकारसूत्रप्रथितेषु आदेशानुवृत्त्यातदिवत् कार्यविधानम्। तत्र सर्वत्र मुख्यं लक्ष्यं सरलतममार्गेण सूत्राणां तात्पर्यसाधनम्। यदस्तु षड्विधेषु सूत्रस्वरूपवेदेषु यद्यपि परिभाषावचनानामन्तर्भावः विद्यते, तथापि विषयबाहुल्यादत्र केवलं अधिकारसूत्रभेदे प्रथितानां परिभाषावचनामुपपादिनमत्र संक्षेपेन प्रस्तूयते।

परिभाषायाः सूत्रस्वरूपं सर्वथा शास्त्रपरिशीलनविधावलोकितं जायते। उक्तं यत् सूत्रलक्षणे-

> 'अल्पाक्षरमसन्दिग्धं सारवत् विश्वतोमुखम्।
> अस्तोभमनवद्यं च सूत्रं सूत्रो विदोविदुः॥'[१]

लघूनि सूचितार्थानि वेति तल्लक्षणात् सूत्रसंघटनं सर्वता अल्पाक्षरेण भवितव्यम्। पुनश्च पाणिनीयविधौ संज्ञापरिभाषादिभेदेन तेषां विभागोऽपि लक्षितो विद्यते। अनेकानि परिभाषावचनानि विद्यन्ते यानि अल्पाक्षरैः संयुक्तानि विद्यन्ते। तद्यथा- १. कार्यकालसंज्ञापरिभाषाम्[२] (प.सं.२), २. परात् नित्यं बलवत्[३] (प.सं. ४२), ३. चानुकृष्टं तोत्तरत्र[४] (प.सं. ७९) इत्यादीनि। सूत्रसंघटनोपाये पाणिनिना यत् कौशलमबलम्बितं तदपि अत्राश्रितं दृश्यते। अवधीयते संज्ञापरिभाषादिवत् परिभाषावचनं संघटितं विद्यते। पुनश्च सूत्रेषु

कार्यानुसारं कार्यविधेः प्रतिपादनानुसारं च षड्विधप्रकारभेदव्यवस्था कल्पनीया विद्यते। संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकारश्चेति भवेन, यथोक्तं-

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥[५]

यत्प्रतिपादितं पूर्वं मया विषयबाहुल्यदत्र षड्विधसूत्र-स्वरूपभेदव्यवस्थासु केवलमधिकारसूत्रस्वरूपभेदमबलम्ब्योपस्थापनं प्रस्तूयते। अधिकारसूत्रस्वरूपे कार्यविधेः प्रकारानुसारं कुत्रचित् सूत्रानुसारेण कार्यसाधनाय परिभाषावचनानि संघटितानि जायन्ते। अधिकारस्य कार्यानुसारं बहूनि लक्षणानि प्रथितानि। तत्र मुख्यतया 'उत्तरप्रकरणव्यापी अधिकारः'[६] इति सर्वविधं प्रतिपादनम्। अष्टाध्याय्याम् ७५ संख्यकानि अधिकारसूत्राणि वर्त्तन्ते। विधिसूत्रैकवाक्यतया बोधजनकत्वमधिकारत्वम्। अथवा स्वदेशे वाक्यार्थबोधकमुत्तरोत्तरसूत्रेषु स्वघटकपर-समर्थकमधिकारसूत्रम्। अनेन विधिसूत्राणां संज्ञासूत्राणां च अवधिः निर्दिश्यते। अङ्गाधिकारः, संज्ञाधिकारः, संहिताधिकारः, प्रत्ययाधिकारः, प्रतिपदिकाधिकरञ्चेति अनेकविधः अधिकारः उपपादित इति अस्य कार्य्यप्रकारात् अवधीयते। अधिकारो नाम त्रिप्रकारः यथा- १. कश्चित् एकदेशस्थः सर्वशास्त्रमभिज्वलयति प्रदीपवत, २. द्वितीयो यथा वादिवद्धं काष्ठमनुचकारप्रतियोगमुपतिष्ठते। यथा- 'अङ्गस्य' इति। केषाञ्चिन्मते उत्तरोत्तरगमनाधिकार इति स्वरितत्त्वप्रतिज्ञावलात् अस्योपस्थापनम्। कारिकायामुक्तम्- 'प्रतिज्ञास्वरिताः पाणिनीयाः'।[७] नारायणभट्टेनापि तदेव प्रतिपादितम्। सूत्रेषु अनुवर्त्तनीयं सर्वं प्राक्सूत्रेभ्यः अनुवर्तन्ते। तद्व्याख्यायां शरणं त्रयं स्वरितत्वं तु दुर्ग्रहणम्। निषेधोऽपि अन्यः कश्चन विभागः इति केचन प्रतिपादयन्ति। वस्तुगत्या विधिसूत्रे तस्य अन्तर्भावो जायते। यस्य विधिसूत्रस्य यत् कार्यं निषेधसूत्रस्यापि तत् कार्यं केवलं निषेधः विधीयते इति विशेषः।





अधिकारसूत्राणां पाणिनौ यथा सावधिकः निर्देशः निरधिकनिर्देश इति भावन संघटितम्। तथा च कार्यत्रयमधिकारगति-अधिकारः इत्यादिभावेन संघटितं तदत्र नास्ति। नागेशेनापि तदेव प्रकरणं मनसि निधाय अनुबन्धविषये-आदेशविषये-अनुवृत्तिविषये-सर्वर्णग्राहकताविषये-तदन्तविधिविषये-अतिदेशविषये-बलवत्त्वप्रतिपादनविषये-नित्यानित्यप्रतिपादनविषये च अधिकारस्य यानि कार्यप्रकाराणि, तेषामेकत्र संघटनं संसाध्य परिभाषावचनानामुपपादनं साधितम्, यथा-

**अनुबन्धविषये**-

१. अनेकान्ता अनुबन्धाः (प.सं.-४)।

२. एकान्ताः (प.सं.-५)।

ये इत्संज्ञका अनुबन्धाः ते अवयवाः अथवा अनवयवाः इत्याशाङ्कायाम् परिभाषेयम् अवधार्यते यत् अनेकान्ता अनुबन्धा इति। यो ह्यवयवः स कदाचित् तत्रोपलभ्यत एव। अयं तु न तथा, तदर्थभूते विधेय कदाप्यदर्शनात्। एवमेव अनुबन्धस्य एकान्तपक्षे अपि निर्णीतः। सूत्रप्रकृतौ अधिकारस्य यत् स्वरूपं तदत्र उपस्थाप्यते।

३. नानुबन्धकृतमनेकालत्वम्। (प.सं.-६)

४. नानुबन्धकृतमनेजन्तत्वम्। (प.सं.-७)

५. नानुबन्धकृतमसारूप्यम्। (प.सं.-८)

**अधिकारस्य आदेशत्वविषये**-

१. यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः। (प.सं.-१३)

अत्र अनेकविधमिति पदेन स्थानार्थगुणप्रमाणकृतमिति चतुर्विधमान्तर्यं बोध्यते। तत्र चेता इत्यादौ सार्वधातुकार्धधातुकयोः इति सूत्रेण इकारस्य प्राप्तगुणः कथं प्रमाणत आन्तर्यादकारः न जायते इत्याशङ्कायां परिभाषायारस्याः अवतरणं विधीयते। स्थानार्थगुणप्रमाणेषु स्थानतान्तर्यस्य बलीयस्त्वं विधीयते। अधिकारसूत्रकोटिषु अधिकारस्य यत् स्वरूपम् अत्रापि तत् तात्पर्येण कार्यं विधीयते।

२. अर्थवद्ग्रहणे नानर्थकस्य। (प.सं.-१४)

प्रौढवानित्यत्र प्रादूहोढो...इति वार्तिकेन गुणं बाधित्वा बृद्धिर्भवति। परन्तु प्र-पूर्वकातद् वह-धातोःक्तवतुप्रत्ययेन पूर्वोक्तरीत्या निष्पन्ने प्र ऊढवान् इत्यत्र गुणं बाधित्वा बृद्धिः कथं नेति आशङ्कायां परिभाषेयं पठिता। अर्थवद्ग्रहणे सम्भवति सत्यनर्थकस्य ग्रहणं न भवतीति परिभाषया अनया निर्धाय्यते।

३. गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः। (प.सं.-१५)

गौणमुख्ययोरर्थयोर्मुख्ये एवार्थे कार्यसम्प्रत्ययः कार्यप्रवृत्तिर्भवति न गौणे इत्यर्थेनात्र अधिकारत्वं सम्पद्यते।

४. अनिनस्मन् ग्रहण्यान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति। (प.सं.-१६)

अनिनस्मन् ग्रहणानि सार्थकानि अयं रहितानि वा भवन्तु उभयविधान्यपि अन्नन्तेन्नन्तासन्तमन्नन्तानि मन्यन्ते तत्प्रयुक्तानि कार्याणि च लभन्ते इति परिभाषार्थः।

५. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः। (प.सं.-१७)

लोके एककार्यनियुक्ताः कर्मचारिणः यथा सहैव कार्ये प्रवर्त्तन्ते निवर्त्तन्ते च तथैव शास्त्रे अपीति युक्तिरस्यां परिभाषायां मूलम्।

६. एकयोगनिर्दिष्टानां क्वचिदेकदेशोप्यनुवर्तते। (प.सं.-१८)

एकस्मिन्नर्थे योगः सम्बन्धस्तेन निर्दिष्टयोः समुदायाभिधायिद्वन्द्वनिर्दिष्टयोः इत्यर्थः द्वन्द्वस्य तदर्थस्य चैकत्वादेकदेशानुवृर्त्ति न सम्भवतीति अस्याः परिभाषाया अर्थः।

७. भाव्यमानेन सवर्णानां ग्रहणं न। (प.सं.-१९)

अणुदित्सूत्रे (पा.सु.-१.१.६९)[८] प्रत्ययादेशागमेषु सवर्णग्रहणाभावं प्रकारन्तरेणोक्तैवं तर्हि सिद्धे यदप्रत्यय इति प्रतिषेधं शास्ति ततु अनयैव परिभाषया ज्ञायते।

८. भाव्यमानोप्युकारः सर्वणान् गृह्णाति। (प.सं.-२०)

अदसोसेः...(पा.सु.-८.२.८०)९ इति सूत्रे विधीयमान उकार अपि स्वसर्वणान् गृह्णातीति परिभाषेयं ज्ञापयति।





९. वर्णाश्रये नास्ति प्रत्ययलक्षणम्। (प.सं.-२१)

वर्ण आश्रयो निमित्तं यस्य स वर्णाश्रयः, तादृशे कार्ये कर्तव्ये प्रत्ययलक्षणं न भवतीति परिभाषायारस्याः अर्थः। परिभाषयाऽनया गोहितमित्यत्र एकारस्य प्रत्ययलक्षणं निवार्यते। अतएव गोहितमित्यत्र अवादेशः न जायते।

१०. उणादयोव्युत्पन्नानि प्रातिपदकानि। (प.सं.-२२)

अत्रोणादय इत्यस्य उणादिप्रत्ययनिष्पन्नानि इत्यर्थो लक्षणया स्वीक्रीयते। येन परिभाषयारस्या अर्थस्तु उणादिनिष्पन्नानिप्रातिपदिकानि अव्युत्पन्नानि अर्थात् प्रकृतप्रत्ययविवागरहितानि भवन्तीति। अतः कृकमिकंस...(पा.सु. ८.३.४६)[१०] इति सूत्रस्थं कंसग्रहणमेव परिभाषाया अस्याः ज्ञापकम्। एवं भावेन अधिकारसूत्रस्य आदेशविषये अधोलिखितानिपरिभाषावचनान्यत्र प्रतिपादितानि, येषां खलु अधिकारसूत्रवत्तात्पर्यं नीर्णितं जायते। तद्यथा-

११. प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् (प.सं.-२३)

१२. प्रत्ययग्रहणे चापञ्चम्याः। (प.सं.-२४)

१३. उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्। (प.सं.-१५)

१४. स्त्रीप्रत्यये चानुपसर्जने न। (प.सं.-२६)

१५. संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति। (प.सं.-२७)

१६. कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्। (प.सं.-१८)

१७. पदाङ्गाधिकारे तस्य च तदन्तस्य च। (प.सं.-२९)

१४. व्यपदेशिवदेकस्मिन्। (प.सं.-३०)

**अनुवृत्तिविषये-**

१. क्वचिदेकदेशोप्यनुवर्तते। (प.सं.-१८)

अधिकारस्य सूत्रभेदेषु अनुवृत्तितत्त्वप्रतिपादकं परिभाषावचनमिदम्। अर्थाधिकारपक्षे अर्थस्य एकत्वाद् विच्छेदाभावात् एकदेशस्यानुवृत्तिः न भवेत्। पुनश्च शब्दाधिकारपक्षे तु तस्यैव शब्दस्य स्वरितत्वं प्रतिज्ञातां तत्सदृशशब्दान्तरसन्निधानं योगोत्तरे प्रतीयत इति दोषाभावः।

२. भाव्यमानेन सवर्णानां ग्रहणं न। (प.सं.-१९)

विधेयतः प्रयोजकेन सवर्णानां ग्रहणं न भवतीति परिभाषार्थ अथवा हेत्वर्थे भाव्यमानेन विधेयभूतेन हेतुना सवर्णानां ग्रहणं न भवतीति। येन त्यदादिनामित्यत्र आकारस्य विधीयमानत्वात्तत्र न सवर्णग्रहणम्।

**सवर्णग्राहकताविषये-**

१. भाव्यमानोप्युकारः सवर्णान् गृह्णाति। (प.सं.-२०)

उकारः विधीयमान अपि स्वसवर्णान् गृह्णाति इति परिभाषार्थः। अस्याः ज्ञापकं दिव उत् (पा.सु.-६.१.१३९)[११], ऋत उत् (पा.सु.-६.१.१११)[१२] इत्यनयोस्तपरकरणम्। तत्र तपरकरणं तपरस्तकालस्य (पा.सु.-१.१.७०)[१३] इत्यनेन समकालानां बोधाय दीर्घादीनां च विधानवारणाय क्रियते।

२. वर्णाश्रये नास्ति प्रत्ययलक्षणम्। (प.सं.-२१)

वर्ण आश्रयो निमित्तं यस्य स वर्णाश्रय४, तादृशे कार्ये कर्तव्ये प्रत्ययलक्षणं न भवतीति परिभाषायारस्याः अर्थः। परिभाषयाऽनया गोहितमित्यत्र एकारस्य प्रत्ययलक्षणं निवार्यते। अतएव गोहितमित्यत्र अवादेशः न जायते।

**तदन्तविधिविषये-**

१. उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्। (प.सं.-१५)

अलुगुत्तररपदे (पा.सु.-६.३.१)[१४] इति सूत्रोक्त उत्तरपद इतियधिकार षष्ठाध्यायस्य तृतीयपादसम्पाप्ति यावत् वर्तते, तत्र प्रत्ययग्रहणे तदन्तविधिर्न भवतीति परिभाषार्थः। तेनोत्तरपदविशेष्यकतदन्तविधिरपि निषिद्धः। अत्र ज्ञापकं हृदयस्य हृल्लेखयदण्लासेषु (पा.सु.-६.३.५०)[१५] इति सूत्रस्थं लेखग्रहणम्। अन्यथा हृदयं लिखतीति इत्यत्र अणन्ततदादिरूपोत्तरपदपरत्वादेवादेशे सिद्धे अण् ग्रहणात् पृथक् लेखग्रहणं व्यर्थं स्यात्।

२. व्यपदेशिवदेकस्मिन्। (प.सं.-३०)



व्यासश्रीः Vol. XV ISSN 2320-2025

असहाये मुख्यवद् व्यवहारो भवतीति परिभाषार्थः। तेन दशरथस्यापत्यं दाशरथि इत्यादौ दशरथ इति निमित्तसत्त्वे यथादन्तत्वव्यवहारः भवति तथा अस्यापत्यमित्यादौ केवले अकारे अपि अदन्तत्वव्यवहारो भवति।

३. व्यपदेशिवद्भावोप्रातिपदिकेन। (प.सं.-३२)

व्यपदेशिवद्भावः प्रातिपदिकभिन्नेन शब्देन गृहीतेन भवति, सूत्रान्तेत्यादयस्तु प्रातिपदिकानि। अतः व्यपदेशिवद्भावप्रतिषेधेन न दोषः।

**अतिदेशविषये-**

१. ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति। (प.सं.-३१)

सूत्रे यस्य प्रातिपदिकस्य ग्रहणमुच्चारणं वर्तते, तादृशात् प्रातिपदिकात् प्रत्ययविधौ तदन्तविधिर्न इति परिभाषार्थः। गर्गादिग्रहणं गर्गादिभ्यो यञ् (पा.सु.-४.१.१०५)[१६] इत्यत्र कृतं वर्तते। अतस्तत्रानया परिभाषया तदन्तविधिप्रतिषेधात् परमगर्गशब्दात् दोषाभावः। अतः येन विधिस्तदन्तस्य (पा.सु.-१.१.७२)[१७] इत्यत्र भाष्ये दीर्घविधायके प्रत्ययविधिभिन्ने ग्रहणवता प्रातिपदिकेनापि तदन्तविधिर्विधाय स्वसा इत्यादिवत् परमस्वसा परमस्वसारावित्यादावपि दीर्घः साधितः संगच्छते।

२. यस्मिन्विधिस्तदादाबल्ग्रहणे। (प.सं.-३३)

परिभाषायारस्याः स्वीकारे वान्तो यि प्रत्यये इत्यत्र यादि-इत्यर्थलाभः जायते। येन विधिस्तदन्तस्य (पा.सु.-१.१.७२) इति तदन्तविधेः अपवादभूतेयं परिभाषा।

३. एकदेशविकृतमनन्यवत्। (प.सं.-३७)

रामौ इत्यस्य कार्यकालपक्षे च यदा कार्यं तदा संज्ञेति सिद्धान्ताद् बृद्धौ कृतायां सुबन्ततदादित्वाभावात्सूत्राप्राप्त्या पदत्वमसम्भवम् इत्याशङ्कायां परिभाषेयम् अवतार्यते। रामौ इत्यस्य औ इत्यत्र अन्तादिवद्भावेन सुपत्वं व्यपदेशिवद्भावेन यस्माद्विहितस्तदादित्वं चानेतुं न सुशकमिति वाच्यम् एतादृशधर्मस्य व्यपदेशिवद्भावेनानयनासम्भवात्।

तथाहि तत्र पदत्वसम्पादनाय एकदेशविकृतमिति परिभाषैव शरणम्। एवं भावेन अधिकारसूत्रस्य अतिदेशविषये अधोलिखितानि-परिभाषावचनान्यत्र प्रतिपादितानि। तद्यथा-

४. नाजानन्तर्ये बहिष्ट्वप्रवक्लृपतिः। (प.सं.-५१)
५. अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते। (प.सं.-५२)
६. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोऽप्येकदेशो न। (प.सं.-५३)
७. अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप् बाधते। (प.सं.-५४)
८. वार्णादाङ्गं बलीयो भवति। (प.सं.-५५)
९. अकृतव्यूहाः पाणिनीयाः। (प.सं.-५६)
१०. अन्तरङ्गादप्यपवादो बलीयान्। (प.सं.-५७)
११. येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति। (प.सं.-५८)
१२. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति। (प.सं.-५९)
१३. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्। (प.सं.-६०)
१४. मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्। (प.सं.-६१)
१५. अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा। (प.सं.-६२)
१६. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चदुत्सर्गाः। (प.सं.-६३)
१७. प्रकल्प चापवादविषयं तत् उत्सर्गोऽभिनिविशते। (प.सं.-६४)
१८. उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते। (प.सं.-६५)
१९. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाधते। (प.सं.-६६)
२०. अभ्यासविकारेषु बाध्यबाधकभावो नास्ति। (प.सं.-६७)
२१. ताच्छीलिकेषु वासरूपविधिर्नास्ति। (प.सं.-६८)
२२. क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ति। (प.सं.-६९)
२३. लादेशेषु वासरूपविधिर्नास्ति। (प.सं.-७०)
२४. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्। (प.सं.-७१)
२५. प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्। (प.सं.-७२)
२६. विभक्तौ लिङ्गविशिष्टग्रहणम्। (प.सं.-७३)
२७. सूत्रे लिङ्गवचनमतन्त्रम्। (प.सं.-७४)
२८. नञिवयुक्तमन्यसदृशाधिकरणे तता ह्यर्थगतिः। (प.सं.-७५)
२९. गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः। (प.सं.-७६)
३०. साम्प्रतिकभावे भूतपूर्वगतिः। (प.सं.-७७)
३१. बहुव्रीहौ तदगुणसंज्ञविज्ञानमपि। (प.सं.-७८)





३२. चानुकृष्टं नोत्तरत्र। (प.सं.-७९)
३३. स्वरविधौ व्यञ्जनमविद्यमानवत्। (प.सं.-८०)
३४. हल्स्वरप्राप्तौ व्यञ्जनमविद्यमानवत्। (प.सं.-८१)
३५. निरनुबन्धकग्रहणे न सानुबन्धकस्य। (प.सं.-८२)
३६. क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते। (प.सं.-८४)
३८. समासान्तविधिरनित्यः। (प.सं.-८५)
३९. सन्निपातलक्षणो विधिरनिमित्तं तद्विधातस्य। (प.सं.-८६)
४०. सन्नियोगोशिष्टानामन्यतरापाय उभयोरप्यपायः। (प.सं.-८७)
४१. ताच्छीलिके णेण्कृतान्ति भवन्ति। (प.सं.-८८)
४२. धातोः कार्यमुच्चमानं तत्प्रत्यये भवति। (प.सं.-८९)
४३. तन्मध्यपतितस्तद्ग्रहणेन गृह्यन्ते। (प.सं.-९०)
४४. लुग्विकिरणालुग्विकरणयोरलुग्विकरणस्य। (प.सं.-९१)
४५. प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम्। (प.सं.-९२)
४६. अङ्गवृत्ते पुनर्वृत्तावविधिः। (प.सं.-९३)
४७. संज्ञापूर्वकविधेरनित्यत्वम्। (प.सं.-९४)
४८. आगमशास्त्रमनित्यतम्। (प.सं.-९५)
४९. गणकार्यमनित्यम्। (प.सं.-९६)
५०. अनुदात्तेत्वलक्षणमात्मनेपदमनित्यम्। (प.सं.-९७)
५१. नञ्घटितमनित्यम्। (प.सं.-९८)
५२. आतिदेशिकमनित्यम्। (प.सं.-९९)
५३. सर्वविधिभ्यो लोपविधिरिङ्विधिश्च बलवान्ष। (प.सं.-१००)
५४. प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्। (प.सं.-१०१)
५५. विधौ परिभाषोपतिष्ठते नानुवादे। (प.सं.-१०२)
५६. उपपदविभक्तेः कारकविभक्तिर्बलीयसी। (प.सं.-१०३)
५७. अनन्तविकारेन्त्यसदेशस्य। (प.सं.-१०४)
५८. नानर्थकेलोन्त्यविधिरनभ्यासविकारे। (प.सं.-१०५)
५९. प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः। (प.सं.-१०६)
६०. अव्ययप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी। (प.सं.-१०७)
६१. व्यवस्थितविभावषयापि कार्याणि क्रियन्ते। (प.सं.-१०८)
६२. विधिनियमसम्भवे विधिरेव ज्यायान्। (प.सं.-१०९)
६३. सामान्यातिदेशे विशेषानतिदेश। (प.सं.-११०)

६४. प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम्। (प.सं.-१११)
६५. सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्। (प.सं.-११२)
६६. श्रुतानुमितयोः श्रुतसम्बन्धो बलवान्। (प.सं.-११३)
६७. लक्षणप्रतिपदक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्। (प.सं.-११४)
६८. गामादाग्रहणेष्वविशेषः। (प.सं.-११५)
६९. प्रत्यकं वाक्यपकरिसमाप्तिः। (प.सं.-११६)
७०. क्वचित् समुदायेपि। (प.सं.-११७)
७१. अभेदका गुणाः। (प.सं.-११८)
७२. बाधकान्येव निपातनानि। (प.सं.-११९)
७३. पर्जन्यवल्लक्षणप्रवृत्तिः। (प.सं.-१२०)

**बलवत्त्वप्रतिपादनविषये-**

१. पुनः प्रसङ्गविज्ञानात् सिद्धम्। (प.सं.-३९)

पूर्वापरविधियोर्मध्ये परविथिः पूर्वविधेः बाधकः भवति पूर्वपरनित्यानन्तरङ्गापवादानमुत्तरोत्तरं बलीयः (परि. ३८) इति परिभाषावचनात्। तेन भिन्धि इत्यत्र पूर्वत्वात् हुझल्भ्यो...(प.सं.-६.४.१०१)[१८] इति सूत्रेण धि-आदेशः न सम्भवेत् इत्याशङ्कायां परिभाषेयं पठिता।

२. सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव। (प.सं.-४०)

३. पूर्वोत्तरपदनिमित्तकार्यात् पूर्वमन्तरङ्गोप्याकादेशो न। (प.सं.-५३)

एवं प्रकारेण ५५, ५६, ५८, ७१, १००, १०१, १०२, १०३, १०७, ११३, १२२, १२९ इत्यादिष्वपि अधिकारसूत्रबत्तात्पर्यं नीर्णितं जायते।

**नित्यानित्यप्रतिपादनविषये-**

१. शब्दान्तरस्य प्राप्तुवन् बिधिरनित्यो भवति। (प.सं.-४३)

अन्यः शब्दः शब्दान्तरम् अर्थात् पूर्वप्रवृत्तौ शास्त्रस्योद्देश्यतावच्छेदकतावच्छिन्नो यावान् भागस्ततोन्यस्य यो विधिः प्राप्नोति स अनित्य भवतीति परिभाषार्थः।

२. शब्दान्तरात् प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यम्। (प.सं.-४४)





एवं भावेन ४५, ४६, ४७, ४८, ४९, ५० इत्यादिषु परिभाषावचनेषु अधिकारसूत्रवत्तात्पर्यं नीर्णितं जायते। अतः तथ्यानामेतेषां परिशीलनेन प्रथितं जायते यत् अधिकारसूत्राणां कार्यप्रकारेषु प्रामाणिकतासाधनाय, अधिकारसूत्रेषु गोपायितरहस्यानामुन्मोचनाय अधिकारसूत्रवत् परिभाषावचनान्यपि अष्याध्याय्यां सूत्रस्वरूपेषु स्कीयां तनुं वितनुते। यत्र मुख्यमुद्देश्यं तु अधिकारसूत्राणां तात्पर्यसाधनेष्वनवबोधनकाले अनियमे नियमकारिणीभावेन अगत्या हि परिभाषावचनाश्रयणेन वा विधिवद्भावेन तत्र नियमीकरणम्।

——

**पादटीकाः**

१. उद्धृत वायुपुराणम्- ४९/१४२
२. प.सं. २, ३. प.सं. ३, ४. प.सं. ७९
५. उद्धृत. सि.कौ., ६. उद्धृत. सि.कौ. पृ.-७
७. उपदेशजनुनासिक इत्, सि.कौ. पृ.-१४, ८. पा.सु.-१.१.६९
९. पा.सु.-८.२.८०, १०. पा.सु.-८.३.४६
११. पा.सु.-६.१.१३१, १२. पा.सु.-६.१.१११
१३. पा.सु.-१.१.७०, १४. पा.सु.-६.३.१
१५. पा.सु.-६.३.५०, १६. पा.सु.-४.१.१०५
१७. पा.सु.-१.१.७२, १८. पा.सु.-६.४.१०१

# शान्तरसे विषयविरागाख्यो निर्वेदः

**प्रतापकुमारो मेहेरः**

'संस्कृते संस्कृतिप्रियाः समृद्धाः सकलाः कलाः'—इत्यभिधया संस्कृतवाङ्मयं सर्वाङ्गसुन्दरम्। तस्मात् संस्कृतवाङ्मयं विश्ववाङ्मये लब्धप्रतिष्ठितं वर्तते। वेदवेदाङ्गादिशास्त्रतत्त्वेषु परिपूरितमिदं संस्कृतवाङ्मयं सर्वदा विश्वस्य मङ्गलमेव वाञ्छति। तत्र साहित्यशास्त्रं संस्कृतवाङ्मयान्तर्गततया एकं विश्वकल्याणकारकम् अङ्गविशेषम्। यथा सस्कृतभाषा प्राचीनाऽपि चिरनवीना एव राराज्यते, तथैव संस्कृतसाहित्यमपि सर्वदा नवीनमेव प्रतिभाति। वैदिककालात् आरभ्य इदानीं यावत् निर्वाधगत्या प्रवहति संस्कृतसाहित्यस्य अविरलधारा। संस्कृतसाहित्यं सर्वदा किमपि नूतनं वर्ण्यवस्तुम् उररीकृत्य तदाधारेण तात्कालिकं समाजस्वरूपं राष्ट्रस्वरूपं मानवजीवनञ्च विधि तथा निषेधवाक्यमाध्यमेन प्रस्तौति। जीवनस्य विषमपरिस्थितिनां मध्ये संस्कृतसाहित्यम् अलौकिकमानन्दमन्वेषयति। संस्कृतकाव्यानि भारतीयसंस्कृतेः गाथां श्रावयन्ति, नाट्यानि च कमनीयक्रीडां प्रदर्शयन्ति। आदिकाव्यरामायणात् आरभ्य अर्वाचीनसंस्कृतसाहित्यपर्यन्तं संस्कृतसाहित्यस्य एका महनीया, सुदीर्घा, विशिष्टा च परम्परा दरीदृश्यते।

**प्रस्तावना**

यद्यपि काव्यसमालोचनायां रस–गुण–रीति–वृत्ति–छन्दः–पदशय्या–शब्दपाक–औचित्य–अलंकारादीनां सर्वेषां तत्त्वानां सन्निवेशो भवति, तथापि काव्यात्मत्वात् रसपदार्थस्य सर्वतो भावेन महत्त्वं वरीवर्त्ति। मान्यवराः, सर्वेषां जीवने रसाः प्रतिफलिताः भवन्ति।

–जीवने प्रीतिः दृश्यते।
–दुःखम् आयाति।





–जनाः क्रोधिताः भवन्ति।
–मनसि उत्साहः परिदृश्यते।
–विस्मयाख्यं चित्रं प्रतिफलितं भवति।
–स्मितहास्यं मुखे नितरां शोभते।
–चित्तः भये प्रकम्पितः भवति।
–समाजे जुगुप्साभाव अस्ति।

अर्थात्, 'रसे जीवनं रसे मरणम्'। रसं विना स्थति एव नास्ति। शृङ्गारकरुणशान्तादयः नव रसाः जीवने अवश्यं समायान्ति, तथैव रतिशोकनिर्वेदादयः स्थायिभावापि क्रमेण हृदि वर्तन्ते।

अतः रसस्वरूपविषये पण्डितैः विविधानि मतानि उपस्थापितानि।

परन्तु, मान्यवराः, संसारे द्वौ मार्गौ प्रवृत्तिमार्गनिवृत्तिमार्गश्चेति। प्रवृत्तिमार्गाबलम्बिनां कृते शृङ्गारः प्राधान्येन भवति। निवृत्तिमार्गाबलम्बिनां कृते शान्तरसः प्राधान्येन भजते एवञ्च शान्तरसस्य स्थायिभावः निर्वेदः। उच्यते यत्–

'शान्तो नाम निर्वेदस्थायिभावात्मको मोक्षप्रवर्तकः।'

**निर्वेदवैराग्ययोः वैशिष्ट्यम्**

मनसः सर्वाधिका उदात्ता वास्तविकी सहजा नैसर्गिकी च मनोदशा भवति निर्वेदः तथा वैराग्यम्। तत्त्वज्ञानजो निर्वेदो शान्तस्य स्थायी। निर्वेदो हि शोकप्रवाहप्रसवरूपः चित्तवृत्तिविशेषः। वैराग्यं तु रागादिनां प्रध्वंसः। भवतु वा वैराग्यमेव निर्वेदः। किञ्च तत्त्वज्ञानोत्थितो निर्वेद इति वैराग्यस्यैव इदं निर्वेदनाम कृतं स्यात्।

शान्तस्य तु निर्वेदः स्थायी एवञ्च शान्तस्यापि वर्णनं मुमुक्षूणां वैराग्यातिशयप्रतिपत्तये। शम्यते यस्मादिति व्युत्पत्या तस्य निर्वेदपरत्वात्। तृष्णायाः क्षयो यस्मादिति व्युत्पत्या तृष्णाक्षयोऽपि निर्वेद एव। सकल दुःखजालहीनं परमानन्दलाभकाव्यप्रयोगप्रबन्धेभ्यः साधारणतया निर्भासमानम् तथाविधहृदयं विधत्ते निर्वेदः। मनःक्लेशशून्यचित्ततादिसम्बलिता लोकतन्त्रानुगुणव्यवहारः निर्वेदः। यस्तु

नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पत्तिनिमित्तः तत्त्वज्ञानादिमूल आत्मतन्त्रानुगुणव्यवहारः विषयविरक्तिरुपो निर्वेदः मङ्गलमय एवेति भाव्यम्।

मम्मटाचार्येणापि उक्तमस्ति–'निर्वेद स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः'

परन्तु एतत् हेमचन्द्रेण खण्डितम्। हेमचन्द्राचार्येण स्वकीये काव्यानुशासनग्रन्थे नवरसा अङ्गीकृताः। तन्मते शान्तरसस्य सत्ता सर्वविधकाव्येषु जायत एव। तन्मते शम एव शान्तरसस्थायिवावो निर्वेदस्तु व्यभिचारी एवास्ति। यथा–

'ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीत–
निवृत्तिधर्मात्मको मोक्षफलः शान्तः।'

वैराग्यादिविभावो यमनियमाध्यात्मशास्त्रचिन्ताद्यनुभावो धृतिस्मृतिनिर्वेदमित्यादि व्यभिचारी तृष्णाक्षयरुपः शमः स्थायिभावश्चर्वाणां प्राप्तः शान्तो रसः। परिशील्यमाने ज्ञायते निर्वेदः तथा शमः शान्तरसस्य स्थायिभावोच्यते, परन्तु 'गृहकलहादिषु व्यभिचारी'। यत् चिरस्थायी न भवति। अत एव अन्तिमे गत्वा एतदेव सिध्यति यत शान्तरसस्य स्थायिवावः विशुद्धात्मस्वरूपः निर्वेद एभ।

सम्प्रति मनसि प्रश्नः समुदेति निर्वेदस्तु शान्तरसस्य स्थायी तर्हि वैराग्यस्य भूमिका का? अभिनगुप्तस्य मतानुसारं तावत् धर्मादित्रितयमिव मोक्षोऽपि पुरुषार्थ एवञ्च मोक्षप्राप्तौ निर्वेदवैराग्ययोः भूमिका समप्राधान्येन वर्तते। रसगङ्गाधरे पण्डितराजजगन्नाथेन निर्वेदस्य लक्षणे उक्तमस्ति–

'नित्यानित्यवस्तुविचारजन्मा विषयविरागाख्यो निर्वेदः।'

अर्थात्, निर्वेदात् प्राक् वैराग्यमेव समायाति। 'रागादिनां प्रध्वंसः' इति वैराग्यस्य लक्षणे पूर्वं यदुक्तं तत् अतीव समिचीनम्। निर्वेदस्य प्राप्तिर्निमित्तं वैराग्यस्य आवश्यकता अस्ति। आदौ वैराग्यभावनया स्थित्वा इन्द्रियसंयमः करणीयः। सर्वेषु कार्येषु समभावापन्नः





भवितव्यः। इतोऽपि स्पष्टीकरणार्थम् उच्यते– एकफलस्य क्रव्यरूपी अवस्था भवति वैराग्यम् एवञ्च पक्वरूपी अवस्था निर्वेदः। क्रव्यावस्थायां रागादिनां प्रध्वंसः जायते एवञ्च पक्वावस्थायां सकलदुःखजालहीनं भुत्वा परमानन्दस्य प्राप्तिर्जायते। अर्थात् मोक्षः यदि एकफलं तर्हि तस्य मोक्षरुपकफलस्य क्रव्यावस्था वैराग्यम् एवञ्च पक्वावस्था निर्वेदः। मोक्षप्राप्तये उभयस्य योगदानम् अत्यन्तं प्रामुख्यरूपेण भजते।

**उपसंहारः**

यतोहि मोक्षस्य सर्वपुरुषार्थेभ्यः प्राधान्यम्। मोक्षप्राप्तये शान्तरसः नितरां काम्यः। शान्तरसस्य कृते निर्वेदवैराग्ययोः प्राधान्यमिति भगवान्वासुदेवेन महाभारते व्यङ्ग्त्वेन दर्शितम्। अतोच्यते–

यथा यथा विपर्येति लोकतन्त्रमसारवत्।
तथा तथा विरागोऽत्र जायते नात्र संशयः॥

आदिकाव्यरामायणे अपि महर्षिणा जनानां धर्मे एव प्रवृत्तिः, अधर्मात् च निवृत्ति इति वाक्यार्थरूपेण निरुपितोऽस्ति। सन्तोष एव परमं सुखम्। लोकानुरञ्जनमेव राज्ञो धर्मः।

सद्गुणानां प्रशंसा, दुर्गुणानां परिशमनमित्यादि विषयाः प्रतीयमानार्थरूपेण प्रतिपादिताः सन्ति। एतत्सर्वं शान्तिमार्गेणैव, त्यागद्वारा, शमवावेन अर्थात् निर्वेदद्वारा प्राप्तुं शक्यते। कथनस्य अभिप्रायोऽयं यत् लोककल्याणाय, राष्ट्रकल्याणाय, विश्वकल्याणाय च शान्तरसोन्मुखी निर्वेदवैराग्ययोः संस्थापनम् अनिर्वाचम्।

——

सन्दर्भग्रन्थसूची


१. डा. आद्याचरण झा, भारतीयवाङ्मयेषु रससिद्धान्तः, अमर प्रिन्टिङ्ग प्रैस, दिल्ली, १९९८
२. व्रजकिशोर नायकः, साहित्यसौरभम्, सद्ग्रन्थनिकेतनम्, पुरी, ओडिशा, २००३
३. डा. सुमनकुमार झा, संस्कृतसाहित्ये साहित्यशास्त्रे च शान्तरसविमर्शः, सञ्जय प्रकाशन, मुरारीलालस्ट्रीट, अंसारीरोड, दरियागंज-११०००२, २०१६
४. डा. सुज्ञानकुमारमहान्तिः, काव्यतत्वालोकः, शोधप्रकाशनविभागः, राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः, आन्ध्रप्रदेशः, २०१०
५. डा. दशरथ द्विवेदी, रसाभिव्यक्ति, विश्वविद्यालय प्रकाशन, प्रा.लि.चौक, वाराणसी-२२१००१, २००१
६. विद्यामार्तण्ड पं.सीताराम शास्त्री, साहित्यसिद्धान्त, हिमांशु प्रिन्टर्स, यमुना विहार रोड, मौजपुर, दिल्ली, २००४
७. प्रो. जगदीशचन्द्र शास्त्री, श्रीपरशुरामविजयः महाकाव्यम् प्रतिभा प्रकाशन, शक्तिनगर, दिल्ली, १९९७
८. प्रो. सुधीकान्त भारद्वाज, परशुरामोदयं महाकाव्यम्, बिन्दापुर, मटियाला रोड, नई दिल्ली, २००९






# गीतायाम् उपलब्धानां शैक्षिकमूल्यानामनुशीलनम्

**हरिदाससूत्रधरः**

अस्मिन् भारतदेशे विविधभाषाभाषिणः नानावेशभूषाधारिणः विभिन्नदेवोपासकाः, विविधस्थाने निवासितः जनाः सन्ति। तेषां भाषावेषस्थानोपासन विधिषु भिन्नयः, भवितुमर्हति। परञ्च सर्वेषां देशवासिनां जनानां संस्कृति तु एका एव विद्यते। भारतीयसंस्कृतिना सर्वे भारतीयाः जनाः एकतायाः सूत्रे पुष्पाणि इव प्रस्फुटिताः सन्ति। तेषाम् ऐक्यस्य मूलं संस्कृतिरेव विद्यते। मूल्यमित्यस्य अर्थं भवति मानवानां सार्वजनीनविकाशाय उपकरणानि अर्थात् मानवानाम् आचरण नियमानां समष्टिरेव।

परन्तु वर्त्तमानकाले सर्वत्र मूल्यानां (आचरण-नियमानाम्) ह्रासः दृश्यते। समाजे सर्वत्र भ्रष्टाचार, मानवमूल्यानां विच्छेदः, जातिभाषा-धर्म-प्रान्तादीन् निमित्तीकृत्य समाजे अन्तकलहः प्रभृतयः दरीदृश्यते। एतदार्थं मानवमूल्यानां विकाशाय आचरण-नियमानां पालनं नितराम् आवश्यकमस्ति।

गीतायां यानि शैक्षिकमूल्यानि अर्थात् सामाजिकाः धर्मीयाः राष्ट्रियाः अन्ताराष्ट्रियामूल्याः उपलब्धानि तानि निम्नलिखितप्रकारेण क्रियन्ते-

**शैक्षिकमूल्यानाम् अनुशीलनम्**

गीतायां शैक्षिकतत्त्वम् विह्वसंस्कृतेरैतिह्यं गवेषितं चेत्, तर्हि वेदा एव सर्वप्रमुखत्वेन दृष्टिपथम् अवतरन्ति। पञ्चमवेदत्त्वेन विदितः महाभारतस्य भीष्मपर्वतः गीता आगता। गीताशब्दस्य कोऽर्थः इति जिज्ञासायाः निवारणार्थमुक्तम्- गी 'कारं' त्यागरूपस्यात् ता कारं तत्त्वबोधनम् गीतावाक्यमिदं तत्त्वं ज्ञेयं सर्वमुमुक्षुभिः। अर्थात्, गी इत्यस्यार्थः भवति त्यागः। ता इत्यस्यार्थः भवति तत्त्वबोधः आत्मबोधो

वा, त्यागरूपः आत्मबोधकमेव गीता इति पण्डितैः प्रशंसितम्। गीतायामस्यां सर्वासामपि उपनिषदां सारः मनोज्ञयापद्धत्या साधुतरं विविच्यते। मानवः ब्रह्माण्डस्य प्रतिनिधिः। सः ईश्वरस्यांशः। जीवनस्यान्तिमलक्ष्यं शाश्वतसुखानुभूतिः नित्यमुक्तता च। अतः तत् प्राप्त्यर्थं मानवाः शिक्षार्जनं कुर्वन्ति। गीतायां भगवान् श्रीकृष्णः गुरुरूपेण शिष्यार्जुनाय शिक्षां प्रदत्तवान्।

**शिक्षायाः अर्थः**

शिक्षायाः अर्थः भवति मानवस्य सर्वाङ्गीण विकाससाधनम्। गीतानुसारेण सात्त्विकज्ञानमेव शिक्षा। सत्त्वात् संजायते ज्ञानम्...शिक्षामाध्यमेन आत्मानुभूतिः आत्माभिव्यतिश्च कर्तुं शक्यते। यस्य ज्ञानचक्षोः उदयः भवति सः अन्तरात्मनः दर्शनं कर्तुं समर्थः भवति। 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा'[1] गीतायां शैक्षकिधारः भवति कर्म। अतः उक्तं- चातुर्वर्ण्यं मया सृष्टं गुणकर्म विभागशः। कर्ममाध्यमेन जीवने परमानन्दः प्राप्तुं शक्यते। उक्तं- सर्व कर्माखिलं पार्थ ज्ञाने परिसमाप्यते। ज्ञानयोगस्य परिपालनमेव गीतायाः अभिमतम्।

**परिभाषा**

गीताशास्त्रानुसारेण शिक्षायाः परिभाषा एवं भवति-

सर्वकर्माखिल पार्थः ज्ञाने परिसमाप्यते।[2]

अत्र श्रीकृष्णो ज्ञानयज्ञं युक्त्या प्रशंसति। द्रव्ययज्ञाद् ज्ञानयज्ञः श्रेष्ठो भवति। हे अर्जुन, सर्वं कर्म ज्ञाने परिपूर्यते। ब्रह्मणो ज्ञानमेव सर्वोच्चं कर्म। तज्ज्ञानेन सर्वाणि कर्माणि सम्पूर्णानि भवन्ति। नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।[3]

ज्ञानमहात्म्यं सूचयति। तस्य पवित्रतां वदन् तत्प्राप्तेः प्रकारमाह श्रीकृष्णः- आत्मज्ञानेन सदृशं पवित्रतमम् अस्मिन् लोके किञ्चिदपि न विद्यते। तत् श्रेष्ठं ज्ञानं योगसाधनामार्गेण स्वस्मिन् आत्मिन कियता गतेन कालेनोपलभ्यते।





उद्देश्यानि- गीतायां शिक्षायाः उद्देश्यानि अनेकानि उक्तानि। लौकिकालौकिकोभयसता विषये स्पष्टरूपेण लिखितं वर्तते। तानि उद्देश्यानि निम्नोक्तप्रकाराणि भवन्ति-

१. मोक्षप्राप्तिः, २. आत्मज्ञानम्, ३. सद्गुणानां विकासः, ४. परोपकारः, ५. सेवाभावना, ६. जीवनयापनस्य कौशलमित्यादयः।

**पाठ्यक्रमः**

प्रकृत्यनुकूलः पाठ्यक्रमः भवेत्। मुखतः पाठ्यक्रमे द्विप्रकारकाः विषयाः भवन्ति। तद् परापरा इति भेदेन। पराविद्यायां चतुर्दशविद्याः सन्निवेशिताः भवन्ति। ताः चत्वारवेदाः षट्वेदाङ्गानि (६) मीमांसा, धर्मशास्त्रम्, न्यायशास्त्रम्, पुराणमित्यादयः। इयं परविद्या आत्मज्ञानं प्रयच्छति। सा नित्या सात्त्विकी च। अपराविद्यायां लौकिकविषयाणां सन्निवेशः भवति। इयं अपरविद्या पराविद्यायाः प्राप्तिनिमित्तं साधनरूपेण कार्यं करोति। एतेन सह प्रायोगिक-विद्याविषयेऽपिलिखितमस्ति।

**विधयः**

स्वाधायः प्रमुखविधित्त्वेन स्वीक्रियते। प्रश्नोत्तरविधेः प्रयोगः भगवता श्रीकृष्णेन कृतः। श्रद्धया एव ज्ञानं भविष्यति। अतः उक्तम्- श्रद्धावान् लभते ज्ञानम्, योगविधिः, भक्तिविधिः इति माध्यमेन ज्ञानार्जनं शक्यते।

**विद्यालयः**

मानवः समाजे तिष्ठति। अतः समाजे अर्थात् कर्मक्षेत्रम् एव तस्य विद्यालयः। सर्वं ज्ञानं कर्ममाध्यमेन कर्मक्षेत्रे एव प्राप्नोति। अतः कर्मक्षेत्रं तथा अनुभवः ज्ञानार्जनस्य प्रकृष्टमाध्यमं भवतः।

**गुरुशिष्ययोः सम्बन्धः**

गुरुशिष्ययोः सम्बन्धः अत्यन्तं निविडः भवति। गुरुः कदाचित् पतृवत् मित्रवत् वा शिष्याय ज्ञानं प्रयच्छति। छत्रं गुरुणाम् उपदेशं स्वस्य जीवने आचरति।

उक्तं यत्–

यद् यद् आचरति श्रेष्ठस्तत्तदेवेतरो जनः
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥[4]

मयि कर्म कुर्वाणे कथं लोक संग्रहो भविष्यति इति पूर्वपक्षं समाधातुं श्रीकृष्ण उवाच—हे अर्जुन, श्रेष्ठः पुरुषः लोकेऽस्मिन् यद्यदाचरति, इतरोऽपि तत् कुरुते। श्रेष्ठो जनो हि संसारे मार्गप्रदर्शकदेव भवति। तत्प्रेरणया लोकः तथैवानुसरति।

**अनुशासनम्**

गीतानुसारमात्मानुशासनमेव श्रेष्ठानुशासनम्। तद् व्यतिरिक्तं किमपि बाह्ययानुशासनस्यावश्यकता नास्ति।

**मनसः एकाग्रता**

अस्माकमाधुनिकजीवनमतितरां सङ्घर्षमयं दरिदृश्यते। समाजे सर्वत्र भ्रष्टाचारो मानवमूल्यानामुच्छेदः अपि च सत्सम्प्रदायादीनां विलोपः परिदृश्यते। सर्वत्रापि अस्य फलमभूयते। सम्प्रति जाति–भाषा–धर्म–प्रान्तादीन् निमित्तीकृत्य समाजे अन्तःकलहः, जनेषु पारस्परिक सम्बन्धानां विच्छेदः, सामाजिक मैत्रेः ह्रासो न किमपि नूतनत्वम्। अनेन महती मानसिकी अशान्तिर्जायते। क्षुद्रं विषयमाधारीकृत्यकलहः, पतौ पत्न्याः, पत्न्यां पतेरश्रद्धा न आश्चर्यस्य विषयो सम्प्रतिः। एतद्भवति दैनन्दिनी घटना। कार्यालये सहकर्मिणः पदान्नेतिमवलोक्य असहिष्णुता, विविध–भोग्यवस्तुषु च महामोहः, सुपथेन कुपथेन वा अधिकाधिकं धनं कथमर्जनीयम् इति अत्याशाः अस्मासु प्रतिदिनं प्रर्धमानाः परिदृश्यन्ते।

एतदर्थं वयं प्रतिदिनम् अहोरात्रञ्च विश्रान्तिं विस्मृत्य दिशि दिशि भ्रमामः। अप्राप्तस्य प्राप्त्यर्थ मनः सदैव प्रधावितं भवति। अकलतकार्ये दुःखमनुभवति। अपरस्योन्नतिं दृष्ट्वा सह्यो न भवति। रात्रौ निद्रा नायाति। कथमपरस्य मादृशी दशा भवेत् तदर्थं सदैव चिन्ता जाग्रता भवति मनसि। अतः मनसः शान्तिः दूरं गच्छति। यदि सूक्ष्मेक्षिकया





विचारयामः तर्हि पश्यामः एतेषां सर्वेषां दुःखानां मूलं भवति अस्माकं मनः। यदि मनसि किमपि वस्तुप्राप्त्यर्थं चिन्ता न स्यात् तर्हि दुःखस्य कारणमपि न तिष्ठेत्। अत उक्तम् 'मन एव मनुष्याणां कारणं बन्धमोक्षयोः।' समेषां दुःखानां कारणं भवति मनः। मनो हि सर्वव्यवहारहेतुः सकलपुरुषार्थसाधनस्य वीजम्। आकांक्षावशात् कामनावशाद्वा अद्य मया इदं कृतम्, श्वः इदं करिष्यामीति चिन्तयति मनुष्यः। न जानाति एषा कामना एव दुःखं सृजति। अत एव गौतमबुद्देनोक्तम् 'कामनाया विनाशे दुःखस्य विनाशः।' मनुष्यस्य स्वाभावविषये, कथं मनुष्यः कार्यं करोति अस्मिन् विषये नृसंहितोपनिषदि सुचारुरूपेण वर्णितमस्ति यत्– 'तस्मात् यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदति कर्मणा करोति।'[5]

इत्थं अस्माकं समस्तस्यापि व्यवहारजातस्य मनो हि हेतुरिति फलितम्। मनः एव मनुष्यानां कारणं बन्धमोक्षयोः इत्युक्तिः प्रसिद्धैव।

मनः एव सर्वदुःखबन्धमुलमिति श्रेष्ठजनानां अभिमतम्। भारतीयाः ऋषयः तस्य नियनत्रणेन, बशीकरणेन च सर्वविधदुःखं नश्यन्ति, तद्वारा आत्यन्तिकीशान्तिं सिद्धतीति मत्वा मनः स्वरूपधर्मव्यापरान् अध्येतुं प्रायतन्तश्च। सामस्त्येन मनस्स्वरूपे खल्ववगते तस्य नियन्त्रणं सुकरम्। इत्थं परमकारुणिकानां वेदर्षिणां दार्शनिकानाञ्च मनोविषयिणी जिज्ञासा समारब्धाः। श्रीमद्भगवद्गीतायां मनसः स्थितिविषये प्रतिपादितं यत्–

'चञ्चलं हि मनः कृष्ण! प्रमाथि बलवद् दृढम्।
तस्याऽहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥[6]

अर्जुनः श्रीकृष्णम्प्रति पृच्छति, भगवन्! एतन्मनः प्रमाथि मनुष्यस्य विचारजातं मध्नाति तथा कामं दृढमपि वर्तते। मानवः यद् विचारयति तत्प्रमथ्य अन्यदेव कर्तुं प्रवर्तयति मनः, अत एतस्य निग्रहः, वायोनिग्रहापेक्षयापि कठिनतरं मन्ये। इदं तथ्यं, यावन्मानवस्य मनसः स्थितिः एकाग्रा न भवति तदवधि स न किमपि कार्यं कर्तुं प्रवृत्तो भवति, न वा तत्र सिद्धिरेव जायते। उपयुक्तस्य पार्थप्रश्नस्योत्तरं वदन् श्रीकृष्णः कथयति–

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥[७]

भगवता श्रीकृष्णोनोक्तं यद् हे महाबाहो! मनस्तु दुर्निग्रहं चञ्चलञ्चास्ति परं भो कौन्तेय! अभ्यासवैराग्याभ्याम् असय ग्रहणं सर्वथा सम्भाव्यम्। यो नरः सततं मनोनिग्रहार्थं प्रयतिष्यति तस्य मनः वशं संगमिष्यति इति अस्मिन् विषये किञ्चित् सन्देहलेशमात्रं नास्ति।

भगवता श्रीकृष्णेन अर्जुनव्याजेन सर्वेषां मानवानां कृते उपदिष्टं यद् अभ्यासेन वैराग्येण च मनः एकाग्रं विधाय कर्मप्रवृत्तौ सति निश्चयमेव जनाः सफलताम् अधिगच्छन्ति। मनसा एकाग्रोपायेन करणीयं कर्म सुष्ठुप्रकारेण साधयितुं शक्यते।

असंयतात्मना योगो दुष्प्राप इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः॥[८]

श्रीकृष्णवचसां सारः अयमेव प्रतिभाति यत् अभ्यासेन, वैराग्येण, वश्यात्मना च मनः स्वायत्तीकर्तुं पार्यते तदनु कार्यसिद्धिः सम्भवति स एव योगः। तपसि संलग्नानां महापुरुषाणां स्वरूपं निरूपयन् एकत्र भगवता विवेचितं वर्तते–

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः॥[९]

अयं ध्यानयोगः कार्यसिद्धौ साधकः किन्तु अयमपि अभ्यासपरवशः। निवातस्थानस्थितदीपज्योतिरिव यदा मानवः स्थिरबुद्धिः सम्भवेत् तदा तस्य मनसः स्थितेः किं वक्तव्यमवशिष्यते। तदा स नूनं लौकिकं पारलौकिकं वा कार्यं साधयितुं सुतरां समर्थः सम्भवति। भक्तिमार्गे तु भगवता भक्ता इत्थमाश्वस्ताः कृताः सन्ति–

'अनन्यांश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥'[१०]

भगवतः भक्तनाम् एकमेव कर्म यद्भगवतोऽनन्यभावेन स्मरणं तदनु सः स्वयमेव तेषां योगक्षेमस्य कर्ताऽस्ति। बुद्धियोगस्य चर्चाऽवसरे





तेन लिखितमस्ति यद् ये भक्ताः मच्चित्ताः, मद्गतप्राणाः च भूत्वा परस्परमित्थमुपदिशन्ति तेभ्यः तादृशीं बुद्धिं प्रदाय तानात्मीयान् करोमीति।

इदं सर्वे सर्वदा वाञ्छन्ति येषु कार्येषु वयं संलग्नाः स्मः तेषु सर्वेष्वपि उत्तरोत्तरं सफलता स्यात्। तत्र सन्ति बहूनि कारणानि, यदिदं जगत् नैकस्मिन् सिद्धान्तेऽवस्थितम्। तत्र केऽपि परिश्रमस्य प्रशंसकाः तदपरे भाग्यवादिनः, इत्थं कार्य पद्धतौ विषमता आयाति। नीचाः विघ्नानां भयेन कारर्यमेव न प्रारभन्ते, मध्यमकोटिकाः पुमांसः विघ्ने सति मध्ये एव विरमन्ति, सन्ति कतिपये दृढसिद्धान्ताः ये स्वकीयं मनः स्थिरीकृत्य कार्यं प्रारभन्ते, तेषां कार्यमध्ये यदि विघ्ना आयान्ति अपि तर्हि ते तानविगणय्य कार्यसमाप्ति यावद् बद्धपरिकरास्तिष्ठन्त्येव, एतदृक् पुरुषपुङ्गवाः कर्मयोगिन इति कथ्यन्ते, किन्तु जगति एतादृशानां संख्या अङ्गुलिगणनीया एव। कर्मसु अपि तानि एव कर्माणि श्रेष्ठानि कथ्यन्ते यानि परेषां हिताय कल्पन्ते। तद्वारा आत्मनोऽपि श्रेयः स्यात्। फलमस्तु मास्तु वा अस्माभिः कर्म कर्तव्यमिति विचार्य ये कर्मक्षेत्रे अवतरन्ति ते कर्मठाः कथ्यन्ते, तेषामेव जगति समादरो भवति। केवलं ये उदरम्भरिणो भवन्ति तेषु न कोऽपि स्निह्यति। लोके स एव उत्तमो योगी कथ्यते यः सर्वेषां परोपकाराय जीवन् कर्मपथान्न विचलति। अतएव गीतायाः पद्यमिदमुदाहरन् विरम्यते विस्तराद्–

'तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद् योगी भवाऽर्जुन॥'[११]

शास्त्रेषु अनेकानि प्रमाणानि उपलभ्यन्ते कर्मफलप्राप्तेः। यथा– न हि कर्म महत् किञ्चित् फलं यस्य न भुज्यते, कर्मणः प्राधान्यं विवण्वता श्रीकृष्णेन गीतायास्तृतीयेऽध्याये निगदितमस्ति–

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवाऽपि सम्पश्यन् कर्तुमर्हसि॥'[१२]

इत्यनेन सिद्ध्यति यत् कर्मणः शास्त्रीयो लौकिको वा समानाधिकारः। इतः परम् अष्टादशाऽध्याये यदा अर्जुनः सन्यासस्य

विषये जिज्ञासते तत्र कथं वर्तितव्यमिति, तदुत्तरयति श्रीकृष्णो मतान्तराणि प्रदर्शयन्–

‘काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः॥’[१३]
‘त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे॥’[१४]

अनयोः पद्ययोः अयम्भावोऽस्ति यत्– पण्डितजनाः काम्यानां (स्त्रीपुत्रधनादिप्रियवस्तूनां प्राप्तये तथा रोगादिसङ्कटापनोदार्थं क्रियमाणानां यज्ञदानतपसाम् उपासनादीनाञ्च) कर्मणां त्यागमेव सन्यासमामनन्ति। तदितरे विचारकुशलाः सर्वकर्मणां फलत्यागं (ईश्वरभक्तेः देवपूजनस्य मातृपितृगुरुजनादिसेवायाः, यज्ञ–दान–तपसां वर्णश्रमानुरूपं वृत्तिद्वारागृहस्थश्रमनिर्वाहस्य, भोजनाच्छादनादिकस्य च किं बहुना यावन्ति कर्तव्यानि कर्माणि सन्ति समेषां तेषां तथा ऐहलौकिकीनाम्पारलौकिकीनाञ्च कर्मणां त्यागः एव सर्वकर्मफलत्यागः) यथार्थं त्यागं जल्पन्ति। अपरे मनीषिणः तदेवं मन्वते सर्वाण्यपि कर्माणि दोषपूर्णानि सन्ति अतएव तानि त्यक्तव्यानि भवन्ति। केचन कथयन्ति यज्ञ दान तपःकर्माणि कथञ्चन नैव त्याच्यानीति। इत्थं भगवता गीतायां परेषां मतं विविच्य स्वकीयमतं समुपस्थाप्य यद् विवेचितं तदत्र उपन्यस्यते–

‘निश्चयं शृणु मे तत्र त्यागे भरतसत्तम्।
त्यागो हि पुरुषव्याघ्र! त्रिविधः सम्प्रकीर्तितः॥’[१५]
‘यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥’[१६]

उपर्युक्तमत–मतान्तरविवेचनानन्तरं निष्कर्षरूपेण भगवान् श्रीकृष्णः वक्ति—हे अर्जुन! कर्मणः त्यागस्य विषये त्वं मदीयं निश्चयं शृणु। हे पुरुषश्रेष्ठ! सात्त्विक–राजस–तामसभेदैः कर्मणां त्रिविधः त्यागो भवति। तेषु संख्यातीतेषु कर्मसु यज्ञदानतप्रोरूपकर्मणां त्यागो निषिद्धः। यतो हि





यज्ञ–दान–तपांसि फलेच्छारहितम् अनासक्तं भगवदर्थकर्मपरायणं मनीषिणं सद्यः पावयन्ति। अत एतानि अपि कर्माणि सङ्गं फलानि च विहाय कर्तव्यानीति मदीयमुत्तमं मतम्। इतः परं भगवान् श्रीकृष्णः कर्मणं सिद्धिहेतुभूतानि सांख्यमतसम्मतानि अधिष्ठानम्, कर्त्ता, कारणम्, विविधाश्चेष्टाः पञ्चमं दैवञ्च विवृणोति। तदनु के कर्मप्ररकाः के च कर्मसंग्रहकरा भावास्सन्ति तान् अधस्तनेन पद्येन उपदिशति–

‘ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना।
करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः॥’[१७]

हे अर्जुन! परिज्ञाता (परितः जानातीति), ज्ञानम् (येन ज्ञायते), ज्ञेयम् (ज्ञातुं योग्यम्) इत्थं त्रिविधा कर्मचोदना (प्रेरणा) भवति, याभिर्मनुष्यः कर्मसु प्रेर्यते तथा कर्ता (करोतीति), करणम् (यैः साधनैः कर्मकरणसाहाय्यं लभते), कर्म (क्रियते इति), इत्याकारकः त्रिविधः कर्मसंग्रहो भवति। इत्थं विविच्य श्रीकृष्णः वर्णधर्मानुसारं कर्मणां विभागमारभते, तद्यथा–

‘शमो दमस्तपः शौचं क्षान्तिरार्जमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥’[१८]
‘शौर्यं तेजो धृतिदक्ष्यिं युद्धे चाप्यपलायनम्।
धनमीश्चरभावश्च क्षात्रं कर्म स्वभावजम्॥’[१९]
‘कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥’[२०]

एवम्प्रकारेण चातुर्वर्ण्यस्य कर्मणां संक्षेपेण वर्णनं विधाय निर्दिशति श्रीकृष्णः– ‘स्वे स्वे कर्मण्यभिरतः संसिद्धि लभते नरः, इति अध्यात्मिकं कर्मणो रूपं विविच्य सामान्यदृष्ट्या कर्मणः किं स्वरूपमिति निरूप्यते—उद्रमः एव कर्म, यः उद्योगं करोति सः स्वास्थ्यं लभते, परोपकाराय यतते, किन्तु यो निष्कर्मशीलो भवति तं सर्वे अजगरादिशब्दैस्तिरस्कुर्वन्ति। स्वकर्मनिरतो मानवः कर्मयोगेन भाग्यमपि परिवर्तयितुं पारयति।

——

पादटीका

१. श्री.म.भ.गी. ४/३७
२. तत्रैव ४/३३
३. तत्रैव ४/३८
४. तत्रैव ४/२१
५. नृसंहितापोनिषदः १
६. श्री.म.भ.गी. ६/३४
७. तत्रैव ६/३५
८. तत्रैव ६/३६
९. तत्रैव ६/१९
१०. तत्रैव ९/१२
११. तत्रैव ६/४६
१२. तत्रैव ३/२०
१३. तत्रैव १८/२
१४. तत्रैव १८/३
१५. तत्रैव १८/४
१६. तत्रैव १८/५
१७. गीता १८/१८
१८. तत्रैव ८/४२
१९. तत्रैव १८/४३
२०. तत्रैव १८/४४





# ग्रन्थसमीक्षणम्

**Prepared by :** Megha Gupta




**Name of the Book :**
राधावल्लवीयसंस्कृतसाहित्ये पर्यावरणचेतना
**Author :** Dr. Purnachandra Upadhyay
**Type :** Research Text
**Publisher :** Sabita Dash
Katha Bharati
Flat No. A112, Narmada Complex
Green Park, Narendrapur, Kolkata-103
**Total Pages :** 100
**ISBN :** 978-81-922208-2-6
**Language :** Sanskrit
**Price :** Rs. 300/-

राधावल्लभीयसंस्कृतसाहित्ये पर्यावरणचेतना (शोधपरियोजना) प्रणेता—डा. पूर्णचन्द्र उपाध्यायः प्रकाशिका, कताभारती, प्लाट नं एए११२, नर्मदाकम्प्लेक्स, ग्रीनपार्क, नरेन्द्रपुरम्, कलिकाता-१०३। प्रथमसंस्करणम्-२०१९, मूल्यम् ३०० रूप्यकाणि।

अर्वाचीनसंस्कृतसाहित्ये पर्यावरणसंवेदना पर्यावरणसंस्कारभावना वा अनेकत्र पल्लवते पुष्पते समुल्लसते च। सप्तस्वध्यायेषु विभक्ते प्रबन्धोऽस्मिन् डा. उपाध्यायेनपूर्णचन्द्रेण अत्याधुनिकसंस्कृतसाहित्यजगति विश्रुतनाम्न अभिनवाचार्यराधावल्लभत्रिपाठिनः सर्वातिशायिव्यक्तित्व-कर्तृत्वपरिचयपुरस्सरं राधावल्लभीये साहित्ये गद्यपद्यनाम्यात्मके नैकत्र निहितायाः पर्यावरणचेतनायाः साध्यवसायं साभिनिवेशं च पर्यालोचनं कृतम्। एषः प्रबन्धः सहृदयसामाजिकानां पुरतः पर्यावरणपुरुषाणां राधावल्लभत्रिपाठिमहाभागानां सांस्कृतिकप्राकृतिकोभयविध-पर्यावरणविषयात्मकचिन्तनस्य विविधान् पक्षानुद्घाटयति सत्प्रेरयति च लोकान् पर्यावरणसंरक्षणं प्रति। शोधपरियोजनायामस्यां सांस्कृतिकपर्यावरणस्य नैकविधसन्दर्भा लेखकेन परामृष्टाः। दुर्बैस्योपरि सबलस्यात्याचारः (मत्स्यन्यायः), दलितोत्पीडनम्, श्रमिकदुर्दशा,

नार्युत्पीडनम्, भ्रष्टाचारः, धर्माडम्बरता, व्यभिचारः दुराचारः, आतंकवादः, धनलोलुपता, भौतिकवादः, स्वार्थमदान्धता, राजनीतिपाखण्डता, सामाजिकोच्छृङ्खलता चेत्यादीनां सांस्कृतिकपर्यावरणप्रदूषणतत्त्वानां सामाजिकविसंगतीनां क्वचित्प्रतीकात्मकतया क्वचिच्च बिम्बविधानमाध्यमेन तीव्रकटाक्षोपेतानि शब्दचित्राणि समुपस्थाप्य मानवीयसंवेदनासंवलितो लेखकोऽयम् लोकचैतन्योद्बोधनद्वारेण तन्निदानार्थमुपायजातं दिशन् सभ्यसुसंस्कृतस्वस्थसमाजस्य प्रस्थापनां कुर्वन् परिलक्ष्यते। नारीसंवेदनानुप्राणितः कविः व्यथतेऽसावान्तः वर्तमानसमाजे नारीदुर्दशां दर्शं दर्शम्। तदत्र कवेरन्तर्व्यथानिवेदकं पद्यमेकं यथा–

'अद्यापि दण्डकवने हिंस्यते च सीता,
क्रूरेण दस्तयुचरितेन दशाननेन।
नायाति किन्तु बत कश्चिदहो जटायु–
स्त्रातुं विदेहदुहितां करुणं लम्पन्तीम्॥'

(लहरीदशकम्, अद्यापिलहरी, पृ.सं.२०)

बाह्यप्रकृतेः मानवीकरणत्वं प्राकृतिकरमणीयत्वं च रादावल्लभीयप्राकृतिकपर्यावरणचैतन्यं प्रकटीकुरूतः। समसामयिकपर्यावरणप्रदूषणसमस्यां प्रति जनान् सचेतयति प्रेरयति च तान् वृक्षारोपणं प्रति पर्यावरणप्रेमी आचार्यप्रवरः, यतोहि पुष्टं पर्यावरणमेव प्राणिमात्रस्य चराचरस्य संरक्षकत्वमावहति। शब्दसंयोजने भावाभिव्यक्तौ च प्रबन्धकारः रमणीयत्वं भजते। विषयप्रतिपादनदृष्ट्या सर्वथाऽपूर्वा शोधपरियोजनेयं सार्वकालिकं सार्वदेशिकं समाजोपयोगित्वं भजते। अस्याः परिशीलनेन प्रत्येकमानवस्य चेतासि सांस्कृतिकप्राकृतिकपर्यावरणचेतना स्वपरिवारसमाजराष्ट्रं प्रति कर्तव्यबोधो मानवीयजीवनमूल्यबोधश्चावश्यं जागृताः स्युः इति नाऽत्र काचिद् विप्रतिपत्तिः।





## ग्रन्थसमीक्षणम्

**Prepared by :** Shiuli Barman




**Name of the Book :**
काव्यप्रकाशः (१–६ उल्लासात्मकः)
**Compiler :** Dr. Buddheswar Sarangi
**Type :** Hard copy of e-text 2nd Ed.
**Publisher :** Benaras Marcantile Company
125, Mahatma Gandhi Road, Kolkata- 7
**Total Pages :** 254+18
**ISBN :** 81-86359-28-1
**Language :** Sanskrit
**Price :** Rs. 370/-

**THE AUTHOR**

Dr. Buddheswar Sarangi is a popular name in Sanskrit World. As a scholar of Sanskrit poetics he has credited a number of awards from throughout the country. He was born on 27-05-1968 at Sangogua, Bonai, Sundargarh, Odisha and now work ing as a Associate Professor in Sanskrit literature in Sri Sitaram Vaidic Adarsha Sanskrit Mahavidyalaya.

A number of publication (original creation & research publication) is credited by him. One scholar Dr. Phalguni Mukherjee has awarded the Ph.D. degree in conducting research on Martyabaikunthamahakavyam written by Dr. Sarangi. Two M. Phil. thesis also submitted on his work.

**THE BOOK**

The present work of six chapters led new scholars of Indian Aesthetics to study several aspects of Kavyashastra. This text will help the students and research scholars to enter in Kavyaprakash the critical text of Acharya Mammata. Some technical words and the principles of Indian Aesthetics are discussed in simple style by which a new scholar can easily understand the main idea of the author. Mainly the causes of Kavya, importance of Mangalacharanam, utility of Kavya, soul of Kavya, the variety of Kavya, the Rasasutram, the Dvaniveda, establishment of Vyanjana etc. are discussed through new technic of smart class.

**About 2nd edition**

The first edition of this work was came to the scholar in the year 2012. The total books are sold with in a short period, which shows the public demand. So the 2nd revised edition including chapter VI is going to be published very soon. A special effort is going on to publish the total text with e-class technique.

## Writers World


1. Anand Dr. Puskara
Asst. Professor
Sriramsundar Sanskrit Viswavidya Pratisthan
Ramouli, Dwarbhanga, Bihar
(Adarsha Sanskrit Mahavidyalaya)
2. Balmurugh Dr. R.
Asst. Professor in Nyaya
Sri Raghunathkirtiparisara
Rashtriya Sanskrit Sansthanam
Devprayag, Uttarakhand-249301
3. Ghosal Sandip
Research Scholar
Burdwan University, Burdwan
4. Karana Sudip
Research Scholar
5. Mahapatra Kirtivas
Research Scholar
Dept. of Navya Vyakarana
Rashtriya Sanskrit Sansthanam, Puri, Odisha
Mobile : 7797063543, email : taranikumarpanda@gmail.com
6. Mallick Mrinmay
Asst. Professor
Sri Chaitanya College, Habra, North 24 Parganas
email : mrinmaybajitpur@gmail.com
7. Majhi Dr. Swapan
Asst. Prof. Professor in Sanskrit
Surendranath College, Sealdah, Kolkata
M : 9874222899, email : swapanmajhi86@gmail.com.
8. Meher Pratap Kumar
Research Scholar
Department of Sahitya
Rashtriya Sanskrit Vidyapeetham, Tirupati
9. Mishra Niranjan
Asst. Professor
Dept of Vedabhasya, Rashtri Sanskrit Vidyapith
Tirupati- 517507
10. Panda Dr. Giridhari
Asst. Professor & Head Department of Sanskrit (UG & PG)
Midnapore College (Autonomous)
11. Pramanik Biswajit
Research Scholar
Rashtriya Sanskrit Vidyapeetham
tirupati







12. Mahapatra Kirtivas
Research Scholar
Dept. of Navya Vyakarana
Rashtriya Sanskrit Sansthanam
Puri, Odisha, Mobile : 7797063543
email : taranikumarpanda@gmail.com
13. Mallick Mrinmay
Asst. Professor
Sri Chaitanya College, Habra, North 24 Parganas
email : mrinmaybajitpur@gmail.com
. Mishra Aruna Ranjan
asst. Professor Department of Sanskrit, Pali & Prakrit
Visva-Bharati, Santiniketan-731235 (armishra59@gmail.com
14. Mishra Priyabrata
Asst. Professor in Vyakarana
Sri Ramsundarsanskrita Viswavidyapratisthanam
Ramouli, Dwarbhanga- 847201, Bihar
email : shabda.priyavrat@gmail.com
15. Panda Tarani Kumar
Research Scholar
Department of Sanskrit-Pali-Prakrit
Viswabharati, Santiniketan
16. Meher Pratap Kumar
Research Scholar
Department of Sahitya
Rashtriya Sanskrit Vidyapeetham, Tirupati
17. Roy Shipra
Asst. Prof. Dept. of Sanskrit
Tripura University
18. Saha Samir
Research Scholar, Deptt. of Sahitya
Rashtriya Sanskrit Vidyapeetham, Tirupati
Mobile : 9475243372
email : samskritsahasamir@gmail.com
19. Sahoo Santosh Kumar
Research Scholar
Uttar Odisha Viswavidyalaya, Baripada, Mayurbhanj
Odisha, M : 9438036600
20. Samanta Mrinmoyee, Ph.D. Scholar, Dept. of Sanskrit, Pali, Prakrit, Visva Bharati, Santiniketan, M : 9474113309
21. Satapathy Swetapadma, Asst. Professor, Department of Sahitya, R.S. Vidyapitha, Tirupati
22. Senapati Sukanya
Lecturer in Sanskrit
Christ College, Cuttack

23. Sutradhar Haridas
    Research Scholar
    Raigunj University
24. Upadhyayah Dr. Purnachandra
    Associate Professor in Sanskrita
    Rajakiya Mahavidyalaya, Bundi, Rajasthan

***Book Review***

25. Dr. Megha Gupta
    Asst. Professor in Sanskrita
    Rajakiya Mahavidyalaya, Bundi
    Rajasthan
26. Shiuli Barman
    Asst. Professor (Guest)
    Raiganj University
    Raiganj





## Declaration :


| | | | |
|---|---|---|---|
| 1. | Name of the Magazine | : | **Vyasashrih** (A Refereed Journal) |
| 2. | Place of Publication | : | Vedvyas, Rourkela-4, Odisha-769004 |
| 3. | Language | : | Sanskrit & English |
| 4. | Period | : | Half yearly (January to June & July to December) |
| 5. | President | : | **Dr. Buddheswar Sarangi**<br>Founder, MVNRI |
| 6. | Secretary | : | **Dr. Bhagirathi Nanda**<br>S.L.B.S. Katwaria Sarai, New Delhi |
| 7. | Joint Secretary | : | **Dr. Bharat Bhusan Rath**<br>R. S.V.P. Tirupati |
| 8. | Treasurer | : | **Sri Chandradhwoja Majhi**<br>G.S. Mahavidyalaya, Vedvyas, Rourkela-4 |
| 9. | Chief Editor | : | **Dr. Buddheswar Sarangi**<br>SSVASM, 7/2A, P.W.D. Road, Kolkata-35 |
| 10. | Board of Management | : | **Prof. Sinivas Pathi Sharma**, Vedvyas<br>**Dr. Kishori Das,** Rourkela<br>**Dr. Umakanta Panda,** Vedvyas<br>**Dr. Suresh Kr. Banerji**, Kolkata<br>**Dr. Saroj Kr. Padhi,** BHU, Benaras<br>**Dr. Radha Govinda Tripathy**, Tirupati<br>**Dr. Koushik Malakar**, Kolkata<br>**Dr. Biswaranjan Pati**, Puri<br>**Dr. Bhagaban Samantray**, Puri<br>**Dr. Rajeswar Dwivedi**, Kolkata<br>**Dr. Somanath Dash**, Tirupati |
| 11. | Nationality of Editor in Chief | : | Indian |
| 12. | Publisher | : | Maharsi Vyasadev National Research Institute,<br>Vedvyas, Rourkela-4, Odisha |
| 13. | Printed at | : | Aries<br>7/2A/7, P.W.D. Road, Kolkata-35 |

I hereby declare that the above mentioned information is correct to the best of my knowledge and belief.

S/d.
Dr. Buddheswar Sarangi
President

# व्यास■ीः VYĀSAŚRĪḤ

ISSN 2320-2025

***A Bilingual Refereed Research Journal of Indology***

*Published by*

**Padmashree Ramaranjan Mukherjee Chair of**

Maharshi Vyasadev National Research Institute

A Unit of Vyasayanam, Regd. No. 1635-IV-477/04

Vedavyas, Rourkela-4, Odisha

email : vyasasri12@gmail.com

## MEMBERSHIP FORM

Name :

Father's Name :

Date of Birth :

Educational Qualification :

Nationality :

Research Area :

3 Nos. of your Publications

Contact Address :

At P.O. : Via

Dist. : State.

Pin :

email address :

Mobile No. :

Type of Member

Patron- Rs. 60,000/-, Life Member- Rs. 15,000/-,

Member for 6 yrs.- Rs. 5,000/-

Amount Payment Mode : Cheque/DD/Bank Transfer.

Amount may be transfered to VYASAYANAM

A/c. No. 30217336045 SBI, Panposh, ISFC- 4859

Introduced by :

Signature of the Scholar and date

N.B. : This form must be introduced by a member of Vyasashree or a reputed Sanskrit Scholar of India. The Hard copy of this form must be sent by registered post to Dr. Buddheswar Sarangi, SSVASM, 7/2A, P.W.D. Road, Kolkata- 700035.